Sri Balamanorama Series No. 11.

॥ श्रीः ॥

RÂMA KATHÂ

OF VÂSUDEVA

रा म क था

वासुदेवप्रणीता

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

EDITED BY

C. SANKARARAMA SASTRI, M.A., B.L.,
Advocate, Mylapore, Madras.

PRINTED AND PUBLISHED BY
THE SRI BALAMANORAMA PRESS,
MYLAPORE, MADRAS.

All rights reserved by the Publisher.

Price Annas 8] 1929 [Postage Extra

INTRODUCTION.

Rāmakathā which now sees the light of print for the first time as No. 11 of the Sri Balamanorama Series has been mentioned by the late Mahamahopadhyaya T. Ganapati Sastri in his introduction to Nārāyaṇīya, otherwise known as Bālabhāgavata published under his able editorship in the Trivandrum Sanskrit Series. There he refers to Rāmakathā as one of the nineteen works written by the famous poet of Kerala, Nārāyaṇa Bhaṭṭa, the son of Matṛdatta and a native of Mepputtur Illom in the village of Perumanam on the northern banks of the river Nīlā in North Malabar. Reference is also made to a traditional story that the author of Nārāyaṇīya was relieved of acute rheumatism by the grace of Lord Kṛṣṇa, the presiding Deity of the Guruvāyūr temple for whose propitiation he sung his memorable poem at the rate of ten verses per day. He is said to have flourished in the court of Devanārāyaṇa, king of Ambalapūzha

From the last word of the work आयुरारोग्यसौख्यम्, it is made out that the poem was composed in 1590 A.D., so that the author has to be assigned to the latter half of the 16th century. The inclusion of Rāmakathā among the works of this Nārāyaṇa Bhaṭṭa by the late Dr. Ganapati Sastri is quite inaccurate, for it is directly opposed to the internal evidence furnished by the last verse of Rāmakathā where the author describes himself as Vāsudeva, the son of Nārāyaṇa aṇd Umā.

Next I propose to examine whether this Vāsudeva is the same as the author of Yudhiṣṭhiravijaya. With regard to this latter Vāsudeva, definite information is available that he was a contemporary of King Kulaśekhara, for he himself says so in the following prefatory portion of his Yudhiṣṭhiravijaya :—

तस्य च वसुधामवतः काले कुलशेखरस्य वसुधामवतः ।
वेदानामध्यायी भारतगुरुरभवदाद्यनामध्यायी ॥
समजनि काश्चित्तस्य प्रवणः शिष्योऽनुवर्तकाश्चित्तस्य ।
काव्यानामालोके पटुमनसो वासुदेवनामा लोके ॥

But who is the king Kulaśekhara referred to here is a problem beset with considerable difficulty, for the Kulaśekhara controversy has agitated the minds of the historians of Kerala in

the modern research-world, and has not yet settled down. However, in examining the identity of the authors of Rāmakathā and Yudhiṣṭhiravijaya, it presents little difficulty. In the history of Keraḷa, the name Kulaśekhara repeats itself a number of times. At the time of Śrī Vīra Keraḷa Varman II who reigned over Venād or South Travancore from 1164 to 1167 A. D., the daughter of his brother Śrī Vīra Udaya Mārtāṇḍa Varman, Tribhuvana Devī by name, was married to Śrī Vallabha Pāṇḍya who reigned over Tinnevelly and North Travancore, and of this marriage was born Jaṭāvarman Kulaśekhara Perumāḷ who ascended the throne in 1190 A. D. The second Kulaśekhara Perumāḷ that we meet with is the famous Ravivarma Kulaśekhara Perumāḷ, born of Umādevī, the queen of Venād and Jayasiṁhadeva, the king of Keraḷa in 1266-7 A. D. and he is epigraphically proved to have ruled over Keraḷa in 1299 A. D. with Quilon as his capital, subjugated the Pāṇḍyan and Choḷa kings, made large conquests, and to have been crowned on the banks of the Vegavatī at Conjeevaram in 1313 A. D. Two other Kulaśekharas are Śrī Vīra Ravi Varma Kulāsekhara Perumāḷ (1594 to 1604 A. D.) and Bāla Rāma Varman II

Swāti Tirunāḷ (1829 to 1847 A. D.) Since the author of Rāmakathā, as will be subsequently shown, lived in the latter half of the 17th century when none of the Kulaśekharas lived, we may conclude that he is not identical with the author of Yudhiṣṭhiravijaya.

Nor can he be identified with Vāsudeva, the author of the main work to which Dhātukāvya is a supplement. Dhātukāvya is a poem written by Nārāyaṇabhaṭṭa illustrating grammatical peculiarities in verbal forms in the order of the Dhātupāṭha, probably on the model of Bhaṭṭikāvya. The work is the sequel to a poem by Vāsudeva which illustrates Pāṇini's sutras as may be seen from the following verse in Dhātukāvya—

उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् ॥

That the author of Dhātukāvya is no other than the famous Nārāyaṇa of Bālabhāgavata can be determined from the colophon at the end of its first sarga which reads इति श्रीनारायणभट्टपादमहाकविविरचिते धातुकाव्ये प्रथमः सर्गः, and also from the employment by Rāmapāṇipāda, a commentator on Dhātukāvya, of the word Uparinava meaning Meputtur, the village of Nārāyaṇa, in the concluding stanza of his commentary on the first sarga

which runs thus :—

श्रीनारायणनामकोपरिनवग्रामस्वधामाधिप-
क्षोणीदेवकविप्रकाण्डकलितं यद्धातुकाव्यं शुभम् ।

The verse उदाहृतं etc, referred to above in Dhātukāvya has been commented upon by the commentator thus :— **प्राक्** पूर्वं **वासुदेवेन** वासुदेवनाम्ना कविना **पाणिनिसूत्राणां** अष्टाध्यायीगतानां सूत्राणां **मण्डलं** समुदायः **उदाहृतम्** उदाहरणरूपकाव्यात्मना. If therefore the author of Dhātukāvya is identical with the author oi Nārāyaṇīya, it follows that the author of the principal work to which Dhātukāvya is a supplement must have lived prior to the second half of the 16th century, and cannot be the author of Rāmakathā which is a much later production. Perhaps he may be identified with the author of Yudhiṣṭhiravijaya,

There are two more works ascribed to Vāsudeva in Keraḷa, viz., Tripuradahana and Śāurikathā. The former is a small poem in three Āśvāsas narrating the burning of the demon Tripura by Lord Śiva in the Ardhayamaka style, and the latter is a poem similar in style narrating the story of Kṛṣṇa in five Āśvāsas. But this Vāsudeva cannot be the author of Rāmakathā. for Nīlakaṇṭha, the commentator of Tripuradahana, while explaining the word Ravibhuvaḥ

occurring in the text says :— रविर्नामास्य कवेः पिता तेन वासुदेवेन. Since the father of the author of Rāmakathā is Nārāyaṇa, it is quite certain that the two Vāsudevas are different. Perhaps the author of these two poems also is to be identified with the author of Yudhiṣṭhiravijaya.

With regard to Vāsudeva, the author of Rāmakathā, the prefatory and the concluding stanzas of this work throw a flood of light which enables us to fix his date with remarkable certainty. The two words Ādityavarman and Naralokavīra occurring in the second verse at the beginning of Rāmakathā give an important clue in the matter. The history of Travancore speaks of one Ādityavarma Tiruvādi who in 1333 A.D. transformed Krishnankoil into Ādityavarmachaturvedimangalam. Another Ādityavarman is spoken of as the ruler of Travancore from 1471 to 1478 A. D., followed by a Ravivarman who reigned from 1478 to 1504 A. D. In the period from 1553 to 1567, we meet with another Ādityavarman. The last Ādityavarman that we hear of ruled from 1661 to 1667 A. D. The title of Bhūtalavīra was first assumed among the kings of Travancore by Śrī Vīra Udaya Mārtāṇḍa Varman after his conquest of the Tin-

THE KUPPUSWAMI SAS
RESEARCH INSTITUT
MADRAS-4

nevelly district between 1494 and 1535 A.D. The word 'Naralokavīra' in the second verse of Rāmakathā may well be presumed to denote the title of Bhūtalavīra. Consequently, the first two of the four Ādityavarmans have to be dismissed from our consideration. It therefore ramains for us to choose between the two later Ādityavarmans, for which it is indispensable to refer to the two other works of this author, viz., Saṁkṣepabhārata and Saṁkṣeparāmāyaṇa. The first of these two works contains a reference to King Ravi Varman in the following verses:—

जगदानन्दयन् गोभिः सतां मार्गं सनाथयन् ।
प्रकाशः श्रीकरो राजा रविवर्मा विराजते ॥

गिरां देवी रमा चोभे यं समग्रगुणोज्ज्वलम् ।
आश्रित्य स्वप्रियौ देवौ स्मरतो न कदाचन ॥

तस्याज्ञया सुमनसः पार्थानां चरितं शुभम् ।
ब्रूमः संक्षिप्य सुतरां प्रसीदन्त्विह देशिकाः ॥

The concluding stanza of the same runs thus :—

यदेतद्वृत्तमेतेषां पाण्डवानां महात्मनाम् ।
सेयमेतादृशी कापि वासुदेवस्य निर्मितिः ॥

In this connection it will be useful to refer to the following stanza of Vāsudeva's Saṁkṣepa Rāmāyaṇa.

रामस्य चरितं पुण्यं संक्षिप्य वदतो मम ।
वाल्मीकिमुख्या गुरवः प्रसीदन्तु दयालवः ॥

The similarity of idea and expression in गुरवः प्राचेतसादयश्च सदा in Rāmakathā, प्रसीदन्त्विह देशिकाः in Saṁkṣepabhārata and वाल्मीकिमुख्याःetc. in Saṁkṣeparāmāyaṇa suggests the community of authorship in all the three works. But while Rāmakathā professes to be written at the bidding of king Ādityavarman, Saṁkṣepabhārata professes to be written at the bidding of king Ravivarman, so that Vāsudeva must have been a contemporary of both. To fit in with these data, the Ādityavarman referred to in Rāmakathā must be taken to be the last Ādityavarman (1661—1677 A. D.) who was succeeded by Umayamma Rāṇee (1678 to 1683) who in her turn was succeeded by Ravivarman (1684 to 1718. A. D.) We may therefore safely conclude that the author of Rāmakathā flourished in the latter half of the Seventeenth century.

Coming to the merits of the work, we have to bear in mind that it is one of the very few prose works available in Sanskrit Literature. In point of merit, the author deserves to rank next to Daṇḍin and Bāṇa among prose-writers. He combines the simplicity of Daṇḍin and the richness of descriptive detail characteristic of Bāṇa. Refreshingly free from the ornatennss of Kādam-

barī and the ruggedness of Harṣacarita, Rāmakatha is quite easy-reading, written in a perfectly lucid and flowing style. As an abridgement, the merit of the work is incalculable. While the genius of the author finds the least difficulty in summarizing the elaborate theme of Vālmīki Rāmāyaṇa within an exceedingly short compass, there is no lack of descriptions or rhetoric in the work. By virtue of its brevity and simplicity, this work is bound to command the widest popularity among the students of Sanskrit Literature.

In preparing this edition, I had recourse to the manuscripts of the work in the Government Oriental Manuscripts Library, Egmore, Madras, and the Government Manuscripts Library at Trivandrum. My thanks are particularly due to Brahmasri K. Sambasiva Sastri, Curator, Government Manuscripts Library, Trivandrum for his invaluable help to me in revising the press copy of this book.

C. SANKARARAMA SASTRI,
General Editor,
Sri Balamanorama Series

Mylapore, Madras.
10th May, 1929.

॥ श्रीः ॥

॥ रामकथा ॥

गजवदनमस्तु महते
विधिवदनविहारि दैवतं च परम् ।
श्वःश्रेयसाय भवतां
गुरवः प्राचेतसादयश्च सदा ॥ १ ॥

सतां परित्राणपरः सुमेधा
जितारिषड्वर्गतया महीयान् ।
विभ्राजते विश्रुतविक्रमश्री-
रादित्यवर्मा नरलोकवीरः ॥ २ ॥

चिराय रक्षोपगमेन कुर्वन्
गुर्वीं[1] मुदं यः सुमनोजनानाम् ।
महीजयोदञ्चितपुण्यकीर्ति-
रामोदते राम इव प्रकामम् ॥ ३ ॥

पाठान्तरम्— १. नुतीर्मुदा. २. महीदयोदञ्चित.

तस्याश्चया सर्वजनीनवृत्ते—
रविस्तरा रामकथा पवित्रा ।
निबध्यते गद्यमयी मयेयं
सन्तोऽनुगृह्णन्तु नितान्तमस्याम् ॥ ४ ॥

अस्ति किल जगत्त्रयपरित्राणलीलाविचक्षणानाम् अक्षतभुजद्रविणभूषणानाम् उज्ज्वलयशःप्रसरचान्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनःकैरवाकराणाम् अमेयमहिमाद्भुतानाम् अहिमांशुवंशोद्भवानाम् अवनीश्वराणां शाश्वतं निवासस्थानम् , अनेकविविधमणिकिरणजालनिर्व्यूढबलशासनशरासनसहस्रभास्वरमहाभवनशिखरविराजमानमहारजतकुम्भसंघातसंकटस्खलनजर्जरितखुरपुटघोटकबृन्दमन्दायमानमध्यंदिनसमयसंचारदिवाकरम् , आसन्नवाहिन्या च विबुधविलासिनीविहारविलब्धविलेपनामोदवासितया, चन्द्रमूर्त्येव मानसोद्भवया कुमुदाभोगदायिन्या च, सूर्यमूर्त्येव तमोऽपहया कमलप्रसादसंपादिन्या च, तटिन्या सरय्वा परिशोभमानपरिसरम् , अवनिवनितातिलकायमानं पुरोत्तममयोध्या नाम ।

तत्र च त्रिदशराजनगरसुन्दरीबृन्दबन्दीकरणचणबृन्दारकवैरिबृन्दारकगलविगलदविरलरुधिरच्छटाजटालकौक्षेयक—

क्षपितविपक्षराजमनोरथो दशरथो नाम नरपतिरराजत । स हि महीपतिः अहीनसुपथिसंचारकौशल्यया कौशल्यया, महीयमानसौभाग्यमय्या कैकेय्या, निरुपधिकनिजगुणगरिमपरितोषितमित्रया सुमित्रया च, त्रिभिरमीभिरभिरूपैरनुरूपैरुदारैर्दारैः सह चरितधर्मा, निर्मायपुण्यभरावितर्णिशार्ङ्गधरचरणसरसिजनिस्तुषमतिः, अपरस्परविरोधमहितम् अर्थात्रितयम् अतिचिराय अन्वतिष्ठत् ।

व्यतीतासु च तथा बहुतिथिषु समासु, सामयिकसमापितदुर्वारजरावतारितपलितसमारम्भसंभावितशरीरस्य नरपतेः अप्रजस्तादत्तदुस्तरचित्तामयस्य तस्य पुत्रोत्पत्तिप्रियंकरिणीम्, अश्वमेधाभिधानावितानविधानानन्तरम् अखण्डिततपःप्रभावमण्डनो मुनिर्विभण्डकात्मजन्मा धर्माध्वविध्वंसनैकायनगतदशमुखमुखनिखिलनिशिचरकुलशलभजालकालानलकीलहेलाम्, अशेषलोकसुचरितव्युष्टिरूपामिष्टिमनुष्ठातुमुपाक्रमत ।

तस्मिन्नेव काले निजशिरोमयनवकपालपुरोडाशमहाहुतिपरितोषितस्य भगवतः शम्भोरनुग्रहादुदग्रतरतेजसम् अमनुजावध्यम् उद्धतभुजभूमपरिपीड्यमानजगत्त्रयं दशग्रीवं जिघातयिषुभिर्दिविषद्भिरवलुप्तनिजाधिकारैरभ्यर्थितो भगवा-

नम्भोजनाभो मनुजलीलामवलिलम्बिषमाणः तमेव धार्मिकाग्रेसरं पुत्रीयन्तं वृत्रारिमित्रं विश्वम्भरेश्वरं भूकश्यपमात्मनः पित्रीकर्तुं मनो वितनान ।

तदा च हूयमानादालोलजिह्वाबललिह्यमानजुहुमुखाद्धुतानतो वैश्वानरात् सुमुत्थाय चित्रीयमाणजनतालोचनपीप्यमानमहीयमानाकारः पुरुषः कोऽपि पुरुषोत्तमधामसामग्रीमयस्य महीयसो बहुसुधासारसारस्य पायसस्य परिपूर्णं सौवर्णं भाजनं राज्ञो मनुवंशमुक्तामणेः सविनयप्रसारिते करयुगले समर्पयामास ।

तत्र च प्रथमदारद्वयीविश्राणननिःशेषितचरौ स्थितवति स्थितिविदि नरेश्वरे, ते एव देव्यावतिमात्रदक्षिणे दक्षिणकोसलकेकयेश्वरसंभवे स्वकीयभागांशवितरणेन मगधराजसुतां सुमित्रां कृतार्थयामासतुः ।

अथ विधिवदवसितवितानकृत्यः सभृत्यवर्गः सरयूतीरपरिष्क्रियाया देवयजनात् अनेकराजन्यश्रोत्रियसुचरितामोगमेध्यामयोध्यामुपेत्य, तत्तादृशदिव्यदीदिविप्रकाशनप्रादुर्भवदद्भुतगर्भनिर्भरामोदितदारत्रयावलोकनसुमनायमानः प्रजानाथः अजोद्भूतिप्रयोजनैर्विधानैरनेहसमनैषीत् ।

उपगतवति मासि वैजनने, रजनिचरतिमिरानिकर-कालये सकलमाङ्गल्यमये समये, राज्ञः प्रथममहिषी विगलि-तदोषानुषङ्गम् अपगतकलङ्कसुभगम् अविरतविसारितेजसम् अपरमिव चन्द्रमसं रामचन्द्रमात्मजं जनयामास । सुता च केकयपतेः उदारचेतसम् अविनीयशीलं विनयैकनिधानम् अमेयगुणनिर्भरं भरतमसूयत । सुमित्रा तु पवित्रानुभावौ जगत्त्राणकेलिधुरीणनिस्सीमदोस्सारलक्षणौ लक्ष्मणशत्रुघ्नौ तनयावजनयत् ।

ते च जनमनोहारिभिर्विहारैरतिवाहितकौमारकाः कुमा-रकाः निरवधिकप्रणयबन्धनेन सन्ततमभिलाल्यमाना विधिव-दधिगताभिर्विद्याभिरुद्द्योतमानाः क्रमादवर्धिषत ।

गर्भैकादशे संवत्सरे विहितब्रह्मव्रतेभ्यश्च तेभ्यः सवितृ-सन्तानपुरोहितेन सकलमन्त्रदृशां वरिष्ठेन वसिष्ठेन साङ्गोपाङ्गा त्रयीविद्या सातिशयानुरागमुपादिश्यत । पुरातनमुनीश्वरप्र-तिघविप्लवमाननिजपारिषद्गतिविशेषानुसंधायिनो भगवतो मधुशासनस्यांशतः संभूतैः अखिललोकलोचनोत्सवैः सस्यकैरा-त्मजैः प्रसितचेतसो महीपतेर्दशरथस्य क्षणिकोऽपि तद्वियोगो युगसहस्रायते स्म ।

स्वकोपापादितविपदोः प्रतीहारप्रवेकयोः अभ्यवपित्सया महीमण्डलमलंकुर्वाणस्य प्रणतजनकलितनिर्वाणस्य पत्युरनुवर्तनाय स्वयमखिलभुवनैकमाता कमलालयापि जनकान्वयध्वजस्य सीरध्वजस्य दुहितृत्वमयोनिसंभवाप्यवलम्बमाना तिसृभिरात्मतुल्यगुणाभिरवरजाभिरमा मिथिलापुरे यथासुखमवर्धत ।

पुरैव च नरवानरेतरदुरभिभवस्य दशाननस्य दीर्घसंवेशं विधायकस्य मनुजभवमुपसेदुषो दनुजद्विषः साहायकाय भगवतः कमलसंभवस्याज्ञया सर्वोऽपि दिव्यजनः स्वांशभूतान् अपरिमेयपराक्रमान् इच्छानुरूपरूपान् अवनिधरोन्मूलनेऽप्यनायासवतस्तनयान् अनेकासु जातिषु वलीवदनभल्लूकगोलाङ्गूलमुख्यानुत्पादयामास ।

तत्र च महावानरवीरयूथपतेः ऋक्षरजसः क्षेत्रे बलशालिना समुत्पादितो बलशालिनामग्रेसरः स्वकक्षकुहरप्रसभनिक्षिप्तविश्वविजयोद्धतदशमुखमुखनिवहविस्मरहाहाकारव्याकृतवैभवो वाली नाम वानरराजः स्वशक्तिवशीकृतसमस्तवानरचक्रः, शक्र इवामरावतीम् , अर्कतनयेन नयविनयविक्रमनिधिनानुजन्मना सुग्रीवेण सह कुलपुरीं किष्किन्धामावसति स्म ।

अमरकार्यैकतानचेतसा वेधसैव नियुक्ता दुन्दुभी नाम

गन्धर्वसीमन्तिनी मन्थरेति कृतनामधेया निरातिशयानुवृत्ति-परितोषितेन पत्या प्रतिश्रुतवरद्वयां केकयेन्द्रतनयामुपतिष्ठमाना साकेतमध्यवात्सीत् ।

निराकृतसुरासुरचक्रस्य दुरात्मनः क्षपाचरचक्रवर्तिनः क्षपणाय क्षमातलमुपेयुषि निरुपमतदीयतपोविपाकावासितिप्रतीक्षकार्यावसरे महति दिव्यजनसमाजे, माहाजानिकचरितः स भगवान् कौशिकः सर्वगुणाकरस्य रामस्य मनुजतानुविधानदरसमार्मीलितम् अप्रतिमम् अनुपाधिकं धाम दिव्यास्त्रसंपदा संविवर्धयिषुः अविहितसत्रः सुत्रामसखं दशरथमवलोकक: साकेतनगरमभ्युपेयाय । सत्सङ्गमसमुदितामोदवशंवदेन राज्ञा विधिवदभ्यर्चितो महर्षिर्मारीचप्रमुखैर्निशाचरैर्विहन्यमानस्य सत्रस्य परिरक्षणाय भुवनरक्षाविचक्षणं रामभद्रमेनमयाचिष्ट । सुतविरहासहोऽपि महामतिर्महीपतिः पुरोधसा परिचोदितः तस्मै प्राणेभ्योऽपि प्रियतरमात्मजं सलक्ष्मणं प्रादिक्षत् ।

स च प्रमोदमानहृदयो विनयविशेषाभिरामौ कुमारौ वयोऽनुरूपमहितशरशरासनभासुरकराम्बुजावुपादाय स्वमाश्रमं प्रति प्रतस्थे ।

मध्येमहाटवि घोरतररामचापविष्फारश्रवणस्फायमान-

रोषभरदुष्प्रेक्षाकृतिः अभ्रंलिहशरीरा रभसचर्व्यमाणतापसव्रज-नरुधिरद्रवार्द्रीकृतसृक्कभागा महामायस्य मारीचस्य जननी ताटका नाम निशाचरी तेषामध्वानमुत्कटध्वानमरौत्सीत् ।

तत्क्षणेन च विश्वजनीनचेतसो विश्वामित्रस्य वचसा रघुराजसूनुरमोघारेण शरेण कबलीकृतप्राणया तया सर्वशर्वरी-चारिविनाशक्रियाकाण्डपुण्याहमङ्गलं विदधे । निगृहीततताटकाय तस्मै प्रथमगृहीतबलातिबलाख्यविद्याविद्योतिताय मुनिः अस्तो-कतपःप्रसादम् अस्त्रपारायणमुपादिशत ।

संप्राप्तनिजतपोवनेन तपोधनप्रवरेण यथापुरं प्रारभ्य-माणे सत्रे, करालनलिशैलाकी॰ण मिलदट्टहासस्तनितबाधिरित-दिगन्तरेण प्रकटवलयदंष्ट्राबलाकावलिकलितेन वृष्यमाणकी-लालधारेण यातुधानघनाघननिवहेन व्याप्यमाने च गगने, सपदि समुज्झितक्रियप्रधावमानयाजकनिकरं करतलच्यवमान-दण्डपरिभ्रान्तवटुकुलवदनानिरित्वरावलापवाचालनिकुञ्जपुञ्जम् उद्धावदध्वनीनमुखविगलदब्रह्मण्यकोलाहलम् अधिकभयाव-हकुलम् आश्रमपदमासीत् ।

अपदान्तरमीषदाकलितरोषस्मितमधुरतरमुखारविन्देन रघुनन्दनेन सरभसमर्पयमाणसमरिणास्त्रवेगदूरनिरस्तमारीच-

तूलशकलेन ज्वलदनलकणोत्किरसायकासारानिरस्तकृत्तनिखिलसुबाहुप्रमुखकौणपबलकुणपव्रातपरितर्पितश्येनकङ्कबहुलेन तथा व्यधायि, यथा दुर्लभविषयोपलम्भसंभाविताशः चिराभिलषितम् अशेषसान्तापिकं दशकन्धरमप्यलिलिक्षदाशु कृतान्तः ।

एवमनायासेन दशरथतनयेन विशासितेषु निशिचरेषु, विधिवदेव समापितसप्ततन्तुर्मुनिः मनसि कृतकार्यान्तरः सहैव राजकुमाराभ्यां समुचितकथाविशेषनिशमनपरितोषिताभ्यामाभ्यमाणयज्ञस्य नयज्ञस्य सुहृदः सीरध्वजस्य पत्तनं प्रातिष्ठत । यत्र हि सा हलमुखविलिख्यमानदेवयजनसंभवा हरशरासनसमारोपणपणपरिणयना जगदापदपगमपदवी सीताभिधाना राजपुत्री समुल्लसति स्म ।

मध्येमार्गं च पञ्चशरशरपरवशितसहस्राक्षानुकूलिकतया कुपितस्य पत्युर्गौतमस्य शापबलात्पाषाणभूतया चरणसरसिजसंस्पर्शविधूताशेषपापया विमुक्तशापया सबहुमानमहल्यया विहितमङ्गल्याशिषा दाशरथिना सावरजेनानुगम्यमानो गाधिसूनुः अशिथिलाध्यवसायो मिथिलापुरं प्राविशत् ।

रघुकुलकुमारतनुतरतनुकामनीयकावलोकजानितविस्मयाकुलेन जनकेनापचायितो महर्षिराकलिततदीयमनोरथः पुर-

हरधनुरारोपणाय सकुतुकावतारमुद्रं रामभद्रमादिक्षत् । परमेश्वरपाणिपल्लवदृढग्राहसहनमपि धनुरनायासिना रघुवीरसूनुना समारोप्याकृष्यमाणम् अकठोररसालकाण्डभञ्जमभाजि । लीलाविलूनभृगुवरगुरुधन्वना राघवेण स्वगुणाय परिक्रीतायां प्रथमदुहितरि, समुचितजामातृलाभसमेधितसंमदो जनकस्तिस्रोऽपि तदनुजाः त्रिभ्यो रामानुजेभ्यः प्रतिपिपादयिषुः कुशिकनन्दनानुमोदितः तरसैव प्रहितेन पुरोहितेन प्रणयसान्द्रेण शतानन्देन दशरथमात्मनगरमानाययामास । कृतगोदानमङ्गलेषु कुमारेषु, नरपतिरभिनवयौवनाभिरामां रामाय तनयामयोनिजामददात् । तदनुजां च रमणीयगुणोर्मिलक्षणां लक्ष्मणाय स्वसुतामूर्मिलां नाम, तथा स्वकनीयसः कुशध्वजस्यात्मजे निरुपमसौभाग्यमण्डने माण्डवीश्रुतकीर्तिनामधेये चामोदनिघ्नमना भरतशत्रुघ्नाभ्यां प्रददौ । विश्वामित्रस्तु विहितविश्वकरणीयः प्रणमन्तमन्तेवसन्तम् अवितथाभिर्वैजयिकीभिराशीर्भिरनुगृह्य प्रतीतहृदयः प्रययौ । इति विहितविवाहमङ्गलैरङ्गजावलेपविलोपिरूपधेयैः अनुरूपदारोपशोभितैः सुतैः सह महीपतिर्बहलतरबलकलकलमिलितविदितवादित्रनिध्वानमुखरितहरिदन्तः स्वनगरमभिप्रातिष्ठत ।

तदानीममरकार्यविधानार्थमुपयोक्ष्यमाणे रघुवीरनन्दने निजमुपयुक्तप्रायं धाम संक्रमयिष्यन्, अदसीयं चानुभावमवलुलोकयिषमाणः, स्वगुरुगिरिशगिरीशसारकोदण्डखण्डनोद्भूतमुल्बणमिव रोषभारम् अत्यन्तरक्तेन नयनयुगलेनोद्वमन्, उच्चण्डभुजदण्डविधूयमानकदर्थीकृतराजवंशजगदवकुठारकुठारधारानिरन्तरविनिर्यदनलस्फुलिङ्गभङ्गपिशाङ्कितगगनाभोगः, स्वयं भृगुपतिः तथा व्रजतो दशरथस्याध्वानमिद्धावलेपमरुधत् । विषादभरविहस्तहस्तविस्रस्तशस्त्रे सति समस्तसैन्यमण्डले, भयप्रसरमोमुह्यमानमानसे महीश्वरे, शाश्वतधैर्यसारगभीरिमा रघुराजनन्दनः सपदि सविनयसंलापसंमोदमानान्तरात्मापि प्रकटितघोरसंरम्भेण भगवता सिसंग्रामयिषता किल स्वधाम्ना सह स हस्तसमर्पिते धनुषि नारायणीये स्वयमारोपिते संहितेनामोघेन महेषुणा यदीयामूर्ध्वलोकगतिमुपरुरोध ।

निर्वासितगर्वामयेन परितुष्यता परशुरामेण परिरभ्य परमाशीर्भिरभिनन्दितश्च परितापपराकृतात्मनो जनयितुः पादौ जग्राह । दशरथोऽपि वितथीकृतभृगुवीरहेवाकेन तनयेन विनयशालिना विलूनविषादशङ्कुः उद्वेलसंमदतरङ्गितमहासैन्यपुरस्सरः क्रमेण वधूजनविलोकनकुतूहलाकलितपौरविलासिनी-

जनविस्मयविकस्वरविलोचनकुवलयपरम्परामेचकितवातायनाम् आत्मनगरीमाविशति स्म । वृत्ते च महति महीयमानमहीदेवप्रवरवदनविगलदाशीर्वादमेदुरे विवाहमहोत्सवे, सदारान् दारकान् अनवरतमभिलालयतः परमानन्दपयोधिवीचिमालाविलोलितमानसस्य तस्याविदित एवात्यक्रामदनेहा ।

दिदृक्षमाणेन सुहृदः समागतवता युधाजिता मातुलेन सह मातामहावलोकनाय च शतमखसखो राजा शत्रुघ्नसहितं भरतं केकयान्प्रति प्राजिघाय । रामस्तु सह महनीयपराक्रमलक्ष्मीविहारस्य संस्त्यायेन लक्ष्मणेन निरुपमाननिजगुणगणपरितोषितपौरजानपदः पितरमशुश्रूषत । तथा च व्यतीयमानेषु कतिपयेषु हायनेषु, महीवल्लभो विस्रसासमालिङ्गयमानाङ्गतया राजश्रियः स्वस्मिन् अनुरागशैथिल्यमाशङ्कमान इव सकलसद्गुणैकपात्रं पुत्रे ज्यायसि तां निधातुमियेष ।

प्रतिदिनं परिवर्धमानरामानुरागविवशान्तरात्मभिर्गुरुभिः पौरजानपदैरप्यभिनन्दिताभिलाषः संभृताशेषसंभारो जम्भारिसखः प्रशस्ते मुहूर्ते राजवेषसाविशेषशोभमानगात्रं पुत्रमभिषेक्तुमारभत । तदा तु विधिवचनविधायिनी प्रियभुजिष्या मन्थरा सत्वरमुपेत्य व्याकुला नाम भूत्वा कैकेयी-

मब्रवीत्– "अयि मुग्धे सुभगमानिनि, मन्दासि निन्द्यासि भ्रष्टासि नष्टा चासि, यदद्य महाराजेन प्रकृतिनिर्गुणो माया-मयलौकिकाचारो रामः सौभागिनेयः साम्राज्यपदेऽधिक्रियते । त्वं तु सह दौर्भागिनेयेन भरतेन भिक्षुकी भवितासि।" एवमादिभिर्मन्थरोपजापवचनैः नियतिपाशेन च विवशीकृतचेतना देवी प्रकृतिनिर्दोषापि क्षुभितहृदया समजायत ।

अमर्षविषानलेन च धूमायमाना सा प्रयुज्यमानसामानं राजानं जानकीसौमित्रिमात्रसहायस्य कौसल्यातनयस्य चतुर्दश हायनानि कानने वर्तनम्, आत्मसूनोरभिषेचनं चेति प्रतिश्रुतपूर्वमेव वरद्वितयं प्रार्थयामास ।

आकर्ण्य च तदग्रेसरः सत्यसन्धानां वसुंधराधिपतिरिरंमदापातदेशीयं वचनम् अवचनीयसंपर्ककलङ्कयशाः प्रियतर-तनयवियोगवेदनामूर्च्छायमानमनाः सहसैव छिन्नपातं पपात ।

कैकेयी तु स्मयमाना सविनयमुपतिष्ठमानं रामचन्द्रमवोचत—''वत्स किमर्थं विलम्बसे । मा स्म राज्य-भोगाभोगलोलुपतया गुरुमसत्यवादिनं कार्षीः । तद्भूतमेव निरीयस्व नगरात्" इति ।

तामेव तु मातुराज्ञां शेषामिव विश्वमङ्गलदायिनीं शिरसा सादरं वहमानो राघवः सान्त्ववचनप्रशान्तसंरम्भेण गृहीतगह्वरनर्तनौपयिकसकलकरणेन सह कनीयसा कमनीयवल्कलपरिष्क्रियमाणगात्रः करसरसिजकलितमहितकार्मुकः कौणपकुलजीवनग्रसनकृतमुखनिशातसायकसंपूर्णतूणीरभासुरः चन्द्रिकयेव चन्द्रमा जनकसुतयानुगम्यमानस्तदैव साकेततो निरगात् । अवितर्कितोपनतमहाविपदुदयसंप्लवमानधैर्यास्सर्व एव प्रकृतिपौरजानपदाः प्रलापमुखरैर्मुखैस्तमेव यान्तमनुयान्ति स्म ।

तं च महाजनं निखिलमेव निशि निद्रायमाणं विप्रलभ्य दम्भेतरदाक्षिण्यशाली दाशरथिः तातादेशनियन्त्रितसुमन्त्रसारथिना रथेन गच्छन् अच्छिदुरसौहृदेन निषादराजेन गुहेनाधिष्ठितं शृङ्गिबेरपुरमभजत । तत्र च विरचितजटाबन्धबन्धुरविग्रहो निजपदे निवासयितुकामं प्रियसुहृदं निषादपतिं समुचितया वाचोयुक्त्या सह सुमन्त्रेण निवर्त्य, तदुपनीतया नावा समुत्तीर्य भागीरथीम् , अवाचीमाशामलङ्कुर्वन् भगवतो भरद्वाजस्याश्रममाशिश्रियत् ।

ततस्तदुपदिष्टेन पथा नरपतिमिव बहुवाहिनीपरीतपार्श्वं शब्दप्रपञ्चमिव विविधधातुविकारचित्ररूपं चित्रकूटाभिधानं

धराधरमुपगतो नित्यजागरूकेण हृद्यचरित्रेण सौमित्रिणा परिचर्यमाणः क्रमविगलितस्वजनविरहवेदनः तत्रैव सुखमुवास ।

दशरथस्त्वनधिगतरामगतीनां पुनरपि पुरमेवोपसेदुषां जनानामाक्रन्देन द्विगुणितामनस्यस्तमेव प्रियतनयमनुशोचमनुशोचमविदितविहितसुतनिधनजन्यमन्युवेगकलुषेण करणमुनिना वितीर्णं च सुतविरहशोकनिमित्तमृत्युसंपातलक्षणमात्मनः शापमनुस्मारमनुस्मारमस्पष्टवर्णया गिरा राम रामेति प्रलपन् अदृष्टदुःखपारो दिष्टान्तमेव प्रत्यपद्यत । आनाथ्यदुःस्थे च राज्ये सति प्राज्यमतयः प्रकृतयः सत्वरमवहित्थाकुशलैर्मौलैरनाकलितवृत्तौ भरतशत्रुघ्नावयोध्यामानाययांबभूवुः । श्रुतनिखिलवृत्तान्तो भरतो भृशायमानशोकानलदह्यमानहृदयः तत्तादृशदुश्चरितमलीमसात्मनो मातुरुत्पन्नतया निजशरीरादपि जुगुप्समानो यथाविधि पितुरौर्ध्वदैहिकं कर्म निरवर्तयत् ।

राज्यलक्ष्मीपरिग्रहाय प्रकृतिजनैरभ्यर्थ्यमानोऽप्यसावसंशयालुस्ताननादृत्य सत्वरमेव सह गुरुजनेन निस्तुलबलाभोगनिर्धुतधरावलयः समग्रगुणाकरमग्रजमेवानिनीषमाणस्तत्संनिधानमीहितं दिगन्तरं प्रास्थित ।

पाठान्तरम्— १. मण्डितदिगन्तरं.

स हि ज्यायसोऽनुपदी सुदीनहृदयः सौहृदय्यसान्द्रेण गुहेन सह विहितातिथ्यनिखिलामोदभरितभरद्वाजोपदिष्टमार्गपादविको मार्गोपयुज्यमाननीवारबलिविलोकनजनितकौतुकजानकीसंचारपवित्रिते चित्रकूटतटाश्रमे बृस्यासनोपविष्टमिष्टतमेनानुजन्मना समुपास्यमानमुज्ज्वलजटावल्कलालङ्कारं भ्रातरमवालोकिष्ट ।

निजावलोकविजृम्भमाणशोकाम्भोधितरङ्गाहतस्य पादोपकण्ठनिपतितस्य भरतस्य वदनादवगतपितृविपत्तौ उत्तालवेदनामोमुह्यमाने सदारावरजे दाशरथौ सहसा महाशोकान्धकारितमेव तदाश्रमपदमासीत् ।

द्वितीयोऽपि दाशरथिः कथमपि विहितनिवापक्रियं भ्रातरमधरीकृतसुरासुरसाम्राज्यसंपदं परम्परीणां राज्यलक्ष्मीं परिग्राहयितुमतिवेलं प्रायतिष्ट । न च तस्य स्थेयसीं तां गुरुनिदेशसंस्थां स्पन्दयितुमपि शशाक । गुणवतामग्रिमाय प्रगुणचेतसे च प्रवणाय तस्मै याचमानाय दीनाय रघुपतिः तपोधनप्रतिपादितं पादुकाद्वितयमात्मनः प्रतिनिधित्वेन दयानिधिः प्रादिशत् । "वत्स मा स्म विषदः, तातानुशिष्टसमयावसानमात्रव्यवधानम् अस्मदागमनमवगच्छ" इत्यत्या-

हृतेन सत्यवचसा ज्यायसाभिहितो भरतो नातिचिरेण रघुपतिप्रत्यापत्तिप्रतीक्षानुत्तरकोसलानुपेत्य मुक्तानन्दं नन्दिग्राममावसन् आकलितजटावल्कलो निष्कलुषचित्तवृत्तिरस्खलितशासनो राज्यपदवीविन्यस्तपादुकानियोज्यपदनियोजितात्मा यथान्यायमवनितलमनुपालयन् अनुदिवसगण्यमानकालावयवो रामागमनं प्रतीक्षामास ।

राघवस्तु तपोधननिवेदितनिशाचरदुश्चरितश्चित्रकूटाश्रमादृषीणामभिरक्षणाय क्रमेण भुवनचक्ररक्षणदाक्षिणो रक्षोवीरबलोष्मलां दक्षिणां दिशं परिचस्कार। निजनयनपुटनिष्पादितकुमुदिनीभाग्यसीमानम् अमेयधामानम् अनसूयावल्लभं महामुनिं प्रयतमानसः प्रणम्य क्रमेण प्राकृतलक्षणमिव बहुलताव्याप्तिदुर्गमं महेन्द्रभवनमिव महापुण्यजनाधिष्ठितं करकलितकोदण्डदण्डमण्डलो दण्डकारण्यमाविशत् ।

तत्र च त्रिदशवीरविरोधिने विहितापराधाय विराधाभिधानाय यातुधानाय रम्भापराभवक्षुभितकुबेरशापापादितजात्यन्तरावसायकेन निधनेन स्वाभाविकीमेव गन्धर्वजातिमनुगृह्य नाकलोकं प्रयास्यता प्रतिक्षणभक्ष्यमाणतापसगणक्षणदाचरसिंहसंहतिशरभः शरभङ्गेण मुनीश्वरेण प्रती-

क्षितसमुपलब्धनिरीक्षणक्षणः सुतीक्ष्णप्रभृतिभिर्मुनिवरिष्ठैराधिष्ठितेषु पुण्येष्वरण्येषु यथाभिमतसमयनिर्मितनिवासः शनैर्महता कालेनात्मोदयनिर्विषीकृतविषस्य तपोधनवृषभस्य कलशसंभवस्याश्रममाश्रयति स्म । स च भगवानात्मना तृतीयमतीन्द्रियार्थदृश्वा विश्वानुग्रहार्थमुररीकृतमानुषवेषं पुरुषोत्तममक्षिपुटेनापीयमानः प्रत्यासीददवतारकार्यमेनं दिव्यशस्त्रवितरणेन संभावयामास । अगस्त्याश्रमवासिना च पुलस्त्यान्वयपांसनैरनेकधा परिबाध्यमानानामृषीणामुपसेदुषां दयमानेन रघुनायकेन निखिलनिशाचराधमवधः प्रत्यश्रूयत । निदेशेन च तस्य विश्ववृत्तान्तदर्शिनो दाशरथेः सन्देशाविहरमाणनक्तंचरसंचयदुःसंचरां पञ्चवटीमाटीक्य जनयितुः प्रियमित्रेण गृध्रराजेन सम्पातिसहोदरेण महीधराशिखरसमानवपुषा जटायुषा बद्धानन्दमभिनन्दितदर्शनः प्रातिश्रुते वस्तुनि निमित्तमभिलष्यमाणः प्रसन्नपावनगोदावरीपरिकल्पितपर्णशालः सदारसोदरश्चिराय विहरति स्म ।

अतीतभूयिष्ठे तु दशवदनदिष्टान्तादिवसावसानके गुरुनिर्दिष्टे समये कदाचित् दिगन्तरेषु चरन्ती दुरन्तदुरितसन्ततिरिव गृहीतमूर्तिः, आर्तिदायिनी जगतां, समस्तरात्रिंचर-

चक्रचक्रवर्तिनो लङ्कापतेरवरजा, मायाबलाकलितललितमानुषीवेषा दोषाचरी शूर्पणखा नाम प्रबलदर्पदर्पकावेशविवशिता सीतापतिमुपातिष्ठत । स्मितरुचिरमुखारविन्दस्य तस्य मधुरमधुरसस्यन्दिना वचसा पुनराहितलक्षणं लक्ष्मणं कामयमाना तदुपकण्ठमभजत । तेनापि विचक्षणेन विप्रलभ्यमाना पुनरपि जगदभिरामं राममेवाभिससार । रघुकुलवीरसुषुमाविलोकनविलोलमानसा पत्युरलङ्कारभूतया सीतया परिहस्यमाना सद्यः परिजृम्भमाणरोषसंरम्भदारुणा सकलजनसाध्वसदारुणा स्वेनैव रूक्षरवेण राक्षसेन रूपेण तामभिभवितुमुपाक्रमत ।

तत्क्षणेन रोषभरक्षोभमाणहृदयेन लक्ष्मणेन क्षतकौक्षेयकप्रसभविच्छातविकटस्तनकर्णनासारदनच्छदयानुच्छदयाङ्कुरं निरस्तया निहस्तया तया सविधगहननिवासिनो विबुधवीरविमानिनः सोदरस्य खरस्यात्मनस्तादृशी दुरवस्था सपदि नयनयोः श्रवसोश्च गोचरीचक्रे ।

अनुपलब्धचरीमभिभूतिमसहमानः स चापि रभसविवर्तिविकारभीषणेन दूषणेन जगद्विजयहेलासमुन्नद्धचेतसा च त्रिशिरसा दुर्दमचतुर्दशसहस्रराक्षसवीरचरणवेगाहिण्डमानमहीमण्डलश्चण्डांशुवंशविशेषकमभ्यषेणयत् । अयत्नोपनतप्रति-

श्रुतार्थनिर्वहणप्रहर्षुलमानसो मनुवंशमौलिरपि दृढतरनिबद्धजटाभरो झटिति प्रथमानकोपः प्रथनाय समुदतिष्ठत । लङ्कासमराङ्कविष्कम्भके तस्मिन्महास्कन्दने निरन्तरप्रसृमररघुवीरशरशतशकलितशर्वरीचरशरीरनिर्गत्वररुधिरापगासंभेदद्विगुणिताटोपा गोदावरी विभोरनुभावमावेदयितुकामेव लङ्कापुरपरमपरिखायै सरितांपत्ये सत्वरतरं प्रालहत् ।

एवं च घोराट्टहासमुखरे खरे सानुचरे कृतान्तमुखं प्रवेशिते नितान्तसाध्वसादुद्धावितायां धाराधरोदरभिदुरनखरशिखरायाः शूर्पणखाया लङ्कापुरमधिवास्तव्याय विशङ्कटकठोरवक्षस्तटप्रहारविदलितविषाणविहितसांरावविणविद्राविते रावणाय रावणाय करणवैकल्यादस्फुटाक्षरतया वाचामपाटवे तादृशीं दुर्दशां लक्ष्मणकरवालविक्षतान्यङ्गान्येव विस्पष्टमाचक्षते स्म ।

अवगम्य च तदीयवचसा जनकदुहितुरपरिमेयामङ्गभङ्गिम् , अवनिपालसुतयोश्च याथातथ्यम् , आशराधिपतिः प्रथमाभ्यां प्रथमानाभ्यामाभ्यन्तरविपक्षाभ्यामभिभूयमानस्वान्तः स्वान्ताय समानेन यत्नेनात्मनः स्वसुश्च प्रियमाधित्समानस्तयोरसांनिध्ये सीतामाहर्तुमीहामास ।

तेषां च वञ्चनपथे प्रवर्तिताचित्तः सत्वरमेव कौशिक-

मखसमरमुखे कृतान्तसमाघातस्य रामसायकभयादपथो निवर्तमानस्य मायाविदामग्रेसरस्य मारीचस्य वसतिमभजत । परमादृतस्तं परिशङ्कमानमवोचत—'अयि महामते मातुल, मायामार्गविशारद, मदनार्दितस्य मम कृते जानकी-हृदयहारिणा हाटकहरिणाविग्रहेण रामलक्ष्मणौ दूरीकुरुष्व' इति । मारीचस्तु विदितरघुवीरानुभावः कदध्वनो निवर्तयितुमेनमतिमात्रं प्रायसत् ।

अनिष्टवचनरुष्टे तु तस्मिन्नशिष्टचेतसि निशिचरव-रिष्ठे कराञ्चलविधूतधूमायमानचन्द्रहासे, रामचन्द्रादेवात्मनो मरणं वरं मन्यमानस्ताटकातनयः सहसैव संपश्यमानस्य तस्याप्यत्यन्तविस्मापकं हेमहरिणरूपमूरीकुर्वन् 'अयि निशाचरनाथ, प्रथमं तावदहमेकः प्रवेक्ष्यामि धर्मजन्मभूमेस्सवितृकुलवतंसकस्य रघुपतेरायतनम्, पश्चाच्च नातिचिरादेव भवानपि' इति वचसा मनसा चाभिधाय, क्षणेन जनकतनयाया नयनगोचरो बभूव ।

विविधविहारमनोहरमद्भुतमृगं पुरस्तादवलोकमाना जानकी तस्मिन् प्रसितचेतना कलितकौतुकातिरेकम् 'आर्य क्षत्वरमत्रासन्नमुपेत्य जीवमाहं गृहाणैनम्' इति विधिचो-

दिता कमितारमवोचत । स च विमलविवेकधनोऽपि नियतिपाशयन्त्रितः कराम्बुजकरम्बितकोदण्डकाण्डः शनकैरपयान्तमेनं मृगमन्वयासीत् । प्रतिक्षणमङ्गुलिषङ्गमिवाप्नुवता पुनरपयता च तेन दवीयांसमध्वानं नीयमानो रघूत्तमो निशातमतिरग्राह्यतया निग्राह्यमेव मन्वानस्तस्मै कोमलकराङ्गुलिनखमयूखशारितपुङ्खं विशिखोत्तमं विससर्ज ।

विष्फारश्रवणसमकालमेव 'हा वत्स लक्ष्मण हतोऽस्मि' इति राघवसदृशस्वरामुच्चतरां गिरमुच्चारयन् , स चापि दुर्मतिरिषुनिपातवेदनोदयप्रत्यापन्नप्रत्यभिज्ञायमाननिजमूर्तिरपगतासुरधिवसुधमपप्तत् । आशामुखान्यश्रुवानया चानया मारीचवाचा व्याकुलीकृतहृदया पत्युरेवापायमात्मना निश्चिन्वाना जानकी संजातहृदयकम्पम् अवगतरघुवीरविक्रमम् अप्रतिष्ठासमानम् आत्मरक्षणनियुक्तं सुमित्रापुत्रं तादृक्षैर्वाक्छलयैर्निरगसं निस्ततक्ष, यानि समाकर्णयतः कर्णयुगलादप्यसौ चिरं जुगुप्सांचक्रे ।

तस्मिन्नपि धृतधन्वन्यार्तवचनसूत्रितामाशां प्रस्थिते चपलतरमुपकण्ठवर्ती दशकण्ठः परिगृहीतपरमहंसवेषः स्फुटघटितोर्ध्वपुण्ड्रदन्तुरललाटतटः करकलितरुद्राक्षमालाम-

द्राणि भगवन्नामान्युच्चैरुच्चारयन् कौक्कुटिको जञ्जपूको जानकी-निकटमढौकिष्ट। विधिवदर्पचितः तामाकलितसंलापाम् अनानुलोमिकीम् आर्यहलम् अनार्यमातिरवनिपालतनयामात्मरथमारोप्य दशरथात्मजपथदीयमानविंशतिविलोचनप्रभासन्तानसीमन्तितवियदन्तरो भयपलायमानवैमानिकेन पथा निजनिलयाय प्रतिष्ठते स्म ।

वियत्पदविसृत्वरविदेहतनयाविलापश्रमाकृष्टेनात्यन्तरुष्टेन विपुलपत्रविस्तारस्थागितदिनकरेण जवजितवायुना जटायुना च साटोपमरुध्यत । तं च चञ्चुकोटिशतकोटिप्रहारसंचूर्णितसकलरथावयवमुग्रतरनखरनिकरविदारितवक्षस्तटक्षरित-क्षतजलहरीशारीकृतगहनमण्डलः प्रचण्डचन्द्रहासमण्डलाग्रखण्डितपतत्रं पत्ररथस्सार्वभौममुर्वरायामवपात्य पत्रान्तराधिरूढो निस्तीर्णसरित्पतिः रक्षःपतिः प्रातिकूलिकीं पृथिवीनाथतनयां लङ्कापुरमङ्गलालङ्क्रियायामशोकवनिकायां तत्प्रसादप्रतीक्षश्चिराय निवेशयामास । सा च निशाचरेन्द्रनिर्दिष्टाभिरुग्ररूपाभिरनेकाभिराशरस्त्रीभिरावृता तत्रैव भर्तृचरणाम्बुजासक्तेन मनसा कथमपि समयमगमयत् ।

रघुपतिस्तु विमथितमारीचमृगस्तद्वचनजनितशङ्काङ्कुरः

सपदि समावर्तमानो वर्तनीमध्यनिध्यातेन निगादितनिजागमनानिमित्तेन विदूनमनसा कनीयसा सह प्रतिक्षणदृश्यमानदुःशकुनप्रकाशितविपत्प्रसरो विविधचिन्तातरङ्गभङ्गुरधैर्यसारः सातङ्कभारमाश्रमाभ्यन्तरमविक्षत् । जनकतनयानवेक्षणक्षणसंधुक्षितदुःखभरप्रत्यवसितधैर्यसारः स्खलितचरणकमलम् अनर्गलनिष्पातुकबाष्परयगद्गदिकार्धकबलितमिष्टवर्णविलापवचनम् अविदितावस्थामात्मदयितामन्विच्छन् अवरजसहायो महारण्येषु परिबभ्राम । ऐक्षिष्ट च क्षपाचारितरवारिदारितपक्षतिं प्रत्यासन्नमृत्युं गृध्रराजम् । निगादितजनकनन्दनाहरणोदन्ते च प्रसारितचञ्चुपुटनिर्दिश्यमानदाशि संस्थिते तत्र तातमित्राय स्वकार्यमात्रपरित्यक्तगात्राय च कृपायमाणस्तस्मै विहितपारलौकिककृत्यो मृगयमाणो दयितामामितपाषाणकण्टकदुरवगाहेन गहनमार्गेण दक्षिणां दिशं प्रति संचरते स्म ।

विदूरपथसंचारिणौ विषमविपिनकण्टकमुखविलिख्यमानमुग्धगात्रौ नरेन्द्रपुत्रौ सुत्रामशस्त्रसंपादितकबन्धीभावः कबन्धाभिधानो यातुधानो बबन्ध द्राघिष्ठेन द्रढिष्ठेन भुजयुगलेन। स तु वधविधूतमुनिशापः स्वामेव दैवीं प्रकृतिमवापितो

विदितविश्ववृत्ताश्चित्रीयमाणं रामभद्रमुचितादरमवदत् —'अयि निरवधिप्रभाव रघुवीर मा विषीदः। अतुलबाहुबलेन वालिना निजराज्यतो निष्काशितं निष्ठुरप्रवेष्टनिष्पिष्टसैरिभाकारदुन्दुभिमहासुरस्रुतास्रपूषितदूषिताश्रमावलोकरूषितमतङ्गमुनिपुङ्गवशापात्तदगम्यमृश्यमूकाद्रिमधिवसन्तं हनूमत्प्रभृतिभिरनूनापदानैरुत्तमामात्यैः परिवृतं मित्रीयन्तं मित्रतनयं वानराग्रीयं सुग्रीवमवलोकस्व । ततो नातिचिरादभिमतं लप्स्यसे' इति।

तदुपदिष्टेन पथा प्रयातौ तौ मतङ्गवनशरणया श्रमणया शबर्या संपादितसपर्यौ पम्पापर्यन्तविपिनं परिष्कुर्वाणावाकारानुमेयदुरभिभावौ दूरादेव विलोकयन्नचलाग्रवासी सुग्रीवः सहसा विपक्षपक्षधिया सुतरां बिभाय। प्राहिणोच्च याथातथ्यविविदिषया तदुपान्तं प्रति प्रभञ्जनतनयमहितपुञ्जभञ्जनमाञ्जनेयं मतिमन्तं हनूमन्तम्।

स च सुनिमित्तसम्पातसंभावितकार्यासिद्धिः तरसैव तयोः समीपमुपगम्य विहिताञ्जलिरञ्जसा निवेदितानिखिलवृत्तान्तः कथितनिजदशाविशेषौ राजपुत्रौ समादाय प्रमोदमानहृदयः शब्दविद्यादेशिकस्य द्वादशात्मनो भगवतः स्वात्मजाभ्युदय-

संपादनलक्षणामाश्रुतचरीं गुरुदक्षिणां सुविहितामेव मन्वानः सुग्रीवोपकण्ठमुपेयाय । अकथयच्च प्रणिपत्य प्रणयिने स्वामिने रामवृत्तान्तम् । अभवच्च नरवानरवीरयोरवलोकन-समय एव प्राचीनदशाविशेषोचितयोरनुपाधिकः प्रणयबन्धः । मिथः कथितनिजदुर्दशाविपाकयोरनवरतदीप्यमानशोकानलयोः समिद्धमध्यमतन्मात्रगुणकानलसाक्षिकमपि सख्यमजनिष्ट ।

उभाभ्यां च प्रणयसौरभसमग्राभ्यां रामसुग्रीवाभ्यां सुत्रामपुत्रस्य विशसनं विदेहसुतायाश्च विचयने प्रतिज्ञाते सति, अप्रतिमवालिबलनित्यपर्यङ्कितस्य सख्युः प्रत्ययमुत्पादयन् प्रभुः पृथिवीधरेन्द्रगुरुणो दुन्दुभिकलेबरस्य चरणाङ्गुलिपल्लवेन दूरत उत्क्षेपणं सप्तानां च कुलाचलसामान्यपरिणाहोत्सेधानां महासालानामेकेन शिलीमुखेन विदारणमुदारचेता विदधे ।

संजातप्रत्ययप्रकर्षो वैकर्तनिरनुयुञ्जानाय सख्ये व्यायसः स्वविषयस्य वैरानुबन्धस्य कारणं व्याचख्यौ— 'पुरा खल्वावयोरनुपाधिकसौहार्दसाक्षिणि समये प्रथमविमथितस्य दुन्दुभेः सहोदरं मन्दोदर्या रावणदाराणां दयितं भ्रातरं मयात्मजं मायाविनमाहिताभियोगमाचिरादनीकभुवः

पलायमानमनुद्रुते बलावलिप्ते वालिनि चिरायिते सति अराजके राज्ये प्रकृतिभिरनभिलाषुकमप्यभिषिक्तं मां सरभससमापतितो जिघांसुरसौ कान्दिशीकं विभ्रष्टराज्यमपहृतदारं च कृतवान्' इति ।

ततश्च विश्वासितो विश्ववीरेण राघवेणाश्वासितश्च हरिदश्वसुतस्तदपवादेन क्षणादेव किष्किन्धां समेत्य, सत्यसन्धे तस्मिन् सानुजपवनात्मजे तरुगहनान्तरितविग्रहे सति आरादवतिष्ठमाने, समराय वालिनं समाजुहुवे । निष्क्रान्ते पुरतो बलोत्सिक्ते वल्लीमुखाधिपतौ सुग्रीवेण सह प्रारभ्यमाणसमरे, तयोः समानाकारविक्रमयोर्विशेषमनवगच्छन् संशयालुः क्षणमवतस्थे । अमुक्तविशिखे तस्मिन् प्रबलतरवालिभुजकुलिशप्रहारनिष्पिष्टगात्रः पलायतैव सुग्रीवः ।

अनुगतेन च रामेण प्रचोदितः पुनरप्यभिज्ञानमालाकलितविपुलग्रीवः सुग्रीवो निरस्ततारारहितोक्तिना निष्क्रान्तेन भ्रात्रा सह महद्वन्द्वयुद्धमकरोत् । समरोत्सवरभसप्रवर्धमानबलावलेपो वलारिसुतः क्षणात्काकुत्स्थकार्मुकनिर्मुक्तेन निर्मुक्तभुजगाकारेण शरेण विदार्यमाणविपुलवक्षस्स्थलः क्षीयमाणजीवितः क्षितावपतत् । स पुनः सहस्राक्षविश्राणितां

कार्तस्वरसहस्रपत्रमयीं बलपौरुषवर्धनीमात्मनो मालां विनय-विप्रतीसारभारविनमितग्रीवस्य सुग्रीवस्य ग्रीवाभरणं विधाय नित्यलालितं च निजात्मजमङ्गदमभङ्गुरानुभावे रघुवीरे निधाय तदाननसरसिजसमर्पितनयनः परासुरासीत् ।

विभाकरात्मजस्तदनु विभोराज्ञया विहितवालिदेहनिर्हरणो नीलपवनसुतजाम्बवत्प्रभृतिभिः प्रकृतिभिर्वलीमुखसाम्राज्यपदव्यामभ्यषिच्यत । अङ्गदश्च तारातनयो युवराजश्चक्रे ।

तदा च प्रचुरघनरसगर्भनिर्भरघनाघनस्तनितसमेधितमयूरहर्षासु वर्षासु प्रवर्तमानासु, निवृत्तसञ्चारे जने, शरदागमसमयसंकेतितजनकसुतागवेषणः, सामयिकनिवासाय नवीनकुसुमसौरभीवासितककुम्मुखकदम्बकदम्बसदेशमचलकन्दरं समाश्रयति सानुजन्मनि रघुतिलके, सवितृनन्दनश्चिरविलुप्तविषयसंवेशविलोलमतिरनुपरोधमवरोधमाविशति स्म ।

विरतिमुपेयुषि क्रमेण प्रावृषि समये, विमलनिशाकरकरजालवितानितावियदि शरदि चोपगतायाम्, अनवरतमदमदनमेदुरनवनवरतविस्मर्यमाणमित्रकार्ये कपीश्वरे, दुर्विषहविरहवेदनाविदूनमानसेन दयितामार्गणधौरेयीं सुहृदः

प्रवृत्तिं प्रतीक्ष्य तदनुपलम्भसंभावितरोषावेशरूषितचेतसा ज्यायसा प्रहितो गुरुहितैकजागृविः सुमित्रापुत्रः स्मरस-मरसगन्धयक्षकर्दमसुगन्धां किष्किन्धामुपजगाम ।

स हि रोषकलुषितनयनकमलावलोकजानितभयकम्पि-ताङ्गैः प्रतीहारैर्विरचिताञ्जलिबन्धमपसरद्भिरनिवारितस्तरसा राजभवनमेवाविक्षत् । चिरपरिवृद्धस्य च तस्य वानरेन्द्र-मदोदयमहारोगस्यैक एव सौमित्रिविष्फारध्वनिः सुश्रुतोदि-तपटिमोद्धुरो वृद्धाचिकित्सकः समवृतत् ।

सचिवप्रबोधितार्थः सरसतरतारासान्त्ववचनप्रशान्तरो-षेण सौमित्रिणा सह महीधरगुहागृहमध्यासीनस्य प्रधानामात्य-संवृतः प्रभाकरसंभवः प्रभोः पादारविन्दयुगलमाभिववन्दे । क्षणेन च नानाहरिदन्तसंप्रेषितदूतवचनसंचोदितैः आकम्पितमहीम-ण्डलैः आच्छादितदिवाकरकराभोगैः आपतद्भिरसंख्येयैर्वली-मुखबलैराखिलमेव रोदोविवरमापूरितमासीत् । प्रणतिप्रसा-दितस्य प्रकृतिमधुरात्मनः सख्युरनुज्ञया परिज्ञातसकल-देशविशेषः सुतस्त्विषांपत्युरत्युदारपराक्रमाणां कपीनाम-नेकानि सहस्राणि मासतमीं तिथिं प्रत्यावृत्तिसमयावधिं विधाय जनकतनयागवेषणाय प्रतिदिशं प्रेषयामास ।

ते च विमुक्ततन्द्रा वानरेन्द्रा विचित्य यथानिर्दिष्टमदृष्ट्वैव रामदारानचिरादेव न्यवर्तिषत । तत्र तु ये नयसरणिविचक्षणा दक्षिणामाशां प्रस्थिताः प्रथितभुजवीर्यसम्पदो जाम्बवदङ्गदनीलहनूमदादयस्तेऽप्यनुपलभ्यैव जानकीम् अवसन्नचेतसो विषमाबिलोदरभ्रमणव्यतीतसमयाः तीक्ष्णदण्डाश्चण्डकिरणसुतादुद्विजमाना जीवने निराशा बभूवुः । तेषामचलतटभुवि प्रायोपाविष्टानां नष्टचेतसां परिदेवनावसरप्रस्तूयमाने रामचरिते समाकर्णितसहोदरविपत्तिः प्रत्यासीददुष्णकराकिरणदग्धपक्षो गृध्रराजः संपातिः कन्दरोदराच्छनैर्निरक्रामत् । श्रुतवृत्ताय च तस्मै रामचरितसमाकर्णनप्ररोहणीयपक्षाय परावरज्ञः पुरातनभल्लूकचक्रवर्ती मिथः कथाशेषमकथयत् । स तु क्षणविवृद्धविस्तृतपक्षविक्षेपपवनविधूयमानगिरिकाननः समुड्डीय यामिनीचरपुरोपवनवासिनीमवलोक्य जानकीमचिरादेव समागतः प्रतीक्षमाणेभ्यः प्लवगवीरेभ्यो याथातथ्येन निवेदयामास ।

प्रमदभरसमुन्नद्धचेतसः प्रथमानमानमदाः प्रसरदुद्धतनिध्वानरुध्यमानककुभः प्लवगपरिवृढाः क्षणादेव महेन्द्रमहीधरेन्द्रप्रपातप्रस्तरविस्तारस्फालनकेलिविशीर्णवीचिमा-

लापरिष्करणां दक्षिणापांपतिप्रतीरसीमामासादयामासुः । तत्र पयोधिलङ्घनकुण्ठितप्रसरेषु वानरप्रवरेषु, द्रुहिणसुतवचनवैचित्र्यप्रत्यभिज्ञातप्रभावभूमा रघुपतिस्वहस्तसमर्पितस्फुरदभिज्ञानाङ्गुलीयमहीयमानहस्तो दुस्तरमप्यकूपारं गोष्पदीकर्तुकामः सदागतिसंभवो महेन्द्रस्य महीभृतस्तुङ्गतरं शृङ्गमधिरुह्य स्वामिनश्चरणारविन्दं मनसानुसंदधानः तरसैव समापुप्लुवे ।

खरवैरिकराम्बुजकलितकोदण्डविमुक्तः शर इव निरन्तरायगतिः, वियदध्वनि विश्रमविश्राणनसमुत्पतितं हैमवतीसहोदरं महाशैलमनुमान्य प्रभावजिज्ञासया स्पर्धावर्धितशरीरां द्विरसजननीं सुरसां च वञ्चनया परितोष्य, छायाग्राहिणीं च तोयान्तरचारिणीं निशाचरीं मायाविशेषबृंहितां सिंहिकामुप्रकरजाग्रविदारितविग्रहां विधाय, परमाचलशिखरमण्डनायमाने पश्चिमदिगङ्गनामणिकुण्डले मार्तण्डे, निःशङ्कमानसो लङ्काद्वीपे कुणपाशनविनाशपिशुनो महोल्कादण्ड इव रोषेण ज्वलन्निव पपात । तन्निबन्धनो महान् भुवः कम्पश्चाजनि ।

ततस्तनूकृततनुर्मारुतिर्विरुन्धतीमुदक्प्रतिहारमार्गप्र-

काशितवराङ्गनाकारामनातङ्को लङ्कालक्ष्मीमाभिभूय, निशाकरमरीचिजालीकृते दिशावलये, चन्द्रमणिनिष्यन्दपेशलासु चन्द्रशालासु, चन्द्रिकावतारधौतेषु सौधेषु, मदनचपलायमानयातुधानयौवनकलितप्रसादेषु प्रासादेषु, कामोपभोगकरणरम्येषु हर्म्येषु, विविधरचनासुन्दरेष्ववरोधमन्दिरेष्वपरेषु च तेषु तेषु प्रदेशेषु, महतीं प्रयत्नपदवीमवलम्बमानोऽपि मैथिलीमनवलोक्य शोशूयमानशोकावेशमशोकवनिकायामपि विचेतुकामो विचेतीभवन्नेतदन्तरभाजो महतः शिंशपातरोः शिखरान्तराले चिन्तासंदानितमतिः क्षणं निभृतमवतस्थे । प्रदेशे च तरोरवतार्यमाणदृष्टिः आकर्णितगुणसौरभाविसंवादिनमाकृतिविशेषमाकलयन् 'अये यत्सत्यं दैवेयं प्रसन्नपावनाकृतिः प्रभोः प्राणाः' इति निश्चितमतिर्निश्चिकाय ।

अत्रान्तरे विदेहतनयाविषयविषमशरबाधविषवेगविदूषितमतिः अलब्धनिद्रासुखो दशमुखः स्वयमपररात्रे बहलमणिदीपिकाविलसिताग्रहस्तविलासिनीजनप्रायपरिजनः स्खलितचरणविवशसंचारं तदेव शिंशपामूलमाससाद । मारुतिरपि तस्यात्यारूढरागवेगविसंस्फुलानि घनध्वानघर्घराणि बहूनि विदेहसुतायाश्चावधीरणागर्भानिर्भराणि कोकिलालापको-

मलानि मितानि वचनान्याकर्णयन्नरेन्द्रमानाकिसलयमासांचक्रे ।

अपयाते पुनरस्मिन्नलब्धावकाशे दशाननीविस्मृमर-
विविधपरुषाक्षरे, तदपवादपराणां निशाचरीणामतिदारुणै-
र्वचोभिः अवदीर्णहृदयायास्तस्या नित्यममुक्तनिकटदेशा त्रिजटा
नाम विभावरीचरी विभीषणगृह्यश्च जनः परं शरणमासीत् ।

निद्रायमाणासु पुनस्तासु, तदीयदुर्विषहदुर्वचननिश-
मननिर्विण्णमानसामात्मनो देहं जिहांसन्तीमवेक्षमाणः
तामनिलसूनुरर्कान्ववायप्रशंसामधुरैः सूनृतैर्वचोभिरापादितवि-
स्रम्भां विधाय तरुशिखरतः शनैरवारुक्षत् । प्रणिपत्य
बहुशस्तां प्रशस्तानुभावां समस्तामेव निरस्तामयां रामवार्तां
सविस्तरमावेद्य स्वहस्तावस्थितमभिज्ञानाङ्गुलीयममुष्यै प्रा-
यच्छत् । सापि विपिननिवासमलिनीकृतं तदनुष्णाभिरश्रुधा-
राभिः प्रक्षालयन्ती निजकुचतटीविरदनविहितापराधवाय-
साधमकाणीकरणोदन्तम् असंस्कारपङ्किलवेणीबन्धमलीमसं च
चूडामणिमस्मै प्रत्यभिज्ञानमदिशत् ।

हनूमानपि करकलितचूडामणिः प्रणिपत्य प्रशस्य देवीं
'देवि यत्सत्यमचिरादपरिमेयवलीमुखबलपरिवारः परमकारुणि-

कः पुरीमिमामुपैष्यति दाशरथिः, प्रलयघनस्तनितितिरस्करण-समुद्धतानि आकर्णयिष्यसि प्लवगवीरगर्जितानि, चतुरानन-श्रवणपुटविदारणदारुणान् कर्णामृतीकरिष्यसि रघुनाथचापवि-ष्फारान्, सुमित्रासुतशरशतपातशकलीकृतनिशाचरपिशितजे-मनहर्षायमाणकङ्कामुपलप्स्यसे लङ्काम्' इति बहुधा समाश्वास्य विश्वंभरातनयां, विनयावनम्रमस्तकः तदनुमत्या ततो निर्गच्छन् उत्पुच्छयमानो विरहविच्छायितमगच्छदात्मना दाशरथिम् ।

अथ निजागमनं निशाचरनाथाय निवेदयिष्यता परि-वर्धमानवपुषा पवनजनुषा रुषा भज्यमाने पुरातनसुरालया-वस्कन्दसरभससमुन्मूलितानीतानल्पकल्पतरुगहने प्रमदवने, कुपितेन दशाननेन प्रहितानि जगतां विहिताहितानि तानि वीर्यमहितानि बहूनि निशितानेकप्रहरणप्रभाविराजितानि पिशिताशनसहस्राणि रणे तोरणगतेन तेन द्रुतमेव प्रत्यग्र-किसलयावमर्दमवामृद्यन्त ।

पुनरयमक्षाभिधानं च रक्षोराजकुमारमक्षामशिक्षा-बलगर्वितमम्लानशोभं पुलस्त्यान्वयविषतरुप्रवालमवामृद्नात् । स एष समरविजितसहस्राक्षेण राक्षसेश्वरप्रथमसूनुना मेघनादेन विहितद्रुहिणास्त्रबन्धं कुणपाशपाशपरिकल्पितपाशबन्धासह-

तया निवृत्तमपि कार्यगत्या संभावयन् जम्भारिवैरिणो रावणस्य समीपमुपानीयत ।

अप्रमादिनस्तस्यातिमात्रप्रगल्भानि रघुराजवंशप्रशंसा-मांसलान्यात्मकुत्सादुःसहानि वचनान्यसहमानेन मानधनेन यातुधानपतिना विभीषणवचोनिवर्तितजिघांसेन 'कापेयचपलोऽयं दुर्मुखो वलीमुखपाशो निर्दग्धवालहस्तो निर्मुच्यताम्' इति निशाचरा निरादिश्यन्त

पवनात्मजस्तु स्वामिनिदेशद्विगुणितोत्साहसाइसिककुणपाशविलम्बज्वलनबहुलकीलजालजटालवालः क्षणेन परिपुच्छयमानः सकलामेव लङ्कामनलसमतिरनलसात्कृत्य कृत्यविदां प्रवरः प्रसभनिर्दह्यमानपौरजनवदनगह्वरोदरविसृमरपांरिदेवननिशमनसुखायमानान्तरात्मा सुमनायमानया जनकसुतयानुमतो जवपवनक्षुभितसलिलपूरं सरिद्वल्लभमुल्ललङ्घे ।

सरसनिवेदितनिजोदन्तविस्मापितशेषवानरवरोभिनन्दितः क्षणविलङ्घितदविष्ठमार्गो रघुनन्दनचराणरविन्दयुगलमविरलानन्दः सविनयविशेषमवनम्य सकलामेव तामात्मनः प्रवृत्तिं याथातथ्येन निवेदयामास, चूडामणिं च प्रणयप्रसारिते

कराम्बुजे समर्पयामास, मनसि चाभिज्ञानवचनम् । रघुपतिस्तु संपश्यमानसकललोकदत्तसांश्लाघिनमनन्यसुलभेन परमानन्द-तरङ्गितात्मा परिरम्भेणैनमनुजग्राह ।

अखिलकार्यतत्त्वज्ञोऽपि चिराभिलषितप्रत्युपक्रियावस-रसंप्राप्तिसम्फुल्लप्रहर्षोंदग्रेण प्रियसुहृदा सुग्रीवेण, सुखदुःख-संविभागनिरवद्यपात्रेण सौमित्रिणा, निजमनोरथेनेव तनूम-ता हनूमता, नयाम्बुधिना जाम्बवता, निःशेषशाखामृगसैन्य-पालेन नीलेन चानुमोदितकर्तव्यशेषः क्षणविहितसंनाहसमम्र-सैन्यसंक्षोभदुर्भरधराभारभङ्गुरशेषाहिफणामण्डलश्चण्डतरकोद-ण्डप्रकाण्डकाण्डमाण्डितभुजदण्डो दशकण्ठकण्ठकाण्डखण्डनो-त्कण्ठमानमनाः दण्डधरसनाथां ककुभमभिप्रातिष्ठत । आससाद च नातिचिरादेव सैन्यरजःप्रपञ्चजम्बालिताम्बोरम्भोनिधेरक्ष-य्यधामा दक्षिणस्य प्रचलतरङ्गमालाकलितफेनजालां वेलाम् ।

पारावारनिवेशितस्कन्धावारे च दाशरथौ संचिन्त्य-मानसागरतरणोपाये, समाकर्णिततदीयाभियोगो जनकतनया-संयोगयोगाचिन्तान्तरायविधायिने दैवायेर्ष्यामयप्रसङ्गविमुखो नयापनयविचारचुञ्चुभिः सचिवैः प्रियमित्रैश्च सममीषदाक-ल्पमानमना दशाननः सदसि मदनसन्दानितात्मा मन्त्रयांचक्रे ।

तत्र च प्रायेणायश्शूलिकेषु केषुचिन्निजवासनानुरूपमकुशलोदर्कां गिरो भाषमाणेषु, दोषापेतचेता विभीषणः प्रणम्य राजानं प्रकाशितसौभ्रात्रः सविनयं विज्ञापयामास—'आर्य अनात्मनीनानामविनीतानाममीषां वचनेषु मा स्म तिष्ठथाः । स्वयमेव च चेतसा संपश्यस्व । मन्ये दुर्वारदोर्वीर्यमाद्यदुद्दामखरमुखनिशाचरकुञ्जरपञ्चमुखेन सार्वलौकिकभुजबलगर्वायमाणप्लवगपतिशलभदवानलेन शब्दमात्रशेषीकृतबाहुजवर्णभार्गवाविजयव्याख्यातवैभवेन नयविनयाभिरामेण रामेण वैराायितारः कथंकारं सख्यायिष्यन्ते । तदधुनैव तस्य धर्मविजयिनो धर्मदारान्वितीर्यं परित्रायस्व कृतान्तवदनवर्तिनकंचरकुलम्' इति ।

तथा भाषमाणं विभीषणमुद्भटरोषभरकषायितरूक्षतराक्षिच्छविविच्छर्दवित्रासितसभान्तरो दशकन्धरः समुज्झितसौहृद्यो नितरां निरास्थतैव ।

सोऽपि सत्वरं समुत्थाय सत्पथसंचारचतुरैः सह चतुर्भिरमात्यैरतीत्य वियदध्वानं परिचितपवनसुतनिवेदितस्वरूपः पारेऽपांपति वर्तमानं परमकृपाकूपारं पंक्तिरथनन्दनं पारायणीकृतवान् । आकारनिरीक्षणक्षणमात्रविस्रब्धेन बुद्धि-

शालिना दाशरथिना सादरमुपसंगृहीतश्च तस्य निरुपधिकप्रणपसारभाजनमभवत् । प्रणतवत्सलस्य प्रभवतो निदेशेन प्रकृतिनिरवद्यात्मा रावणानुजः प्रचुरकौतुकप्रमोदवानरवरूथिनीकलकलमांसलितमङ्गलवादित्रविचित्रनिनादसुभगं सुमित्रापुत्रेण स्वहस्तगृहीतकनककलशसंभृताभिः सागरवारिधाराभिः लङ्कापुराधिपत्ये दत्तादरमभ्यषिच्यत ।

तदनु मनुकुलोत्तमः प्रत्ययितस्य प्रत्यग्रलङ्काधिपतेः सत्यवद्यस्य पथ्यया गिरा भागीरथ्याः पतिं प्रसादकः प्रतिरिपरिकल्पिते दर्भशयने समाहितेन मनसा शिरसि विरचिताञ्जलिरुपाविक्षत् ।

तथाच दयितवियोगखेदकृशितात्मनः पयोधितीरभुवि प्रतिशयानस्य तस्य तिसृषु वासतेयीषु व्यतीतासु, अनवरतसंक्रीडमानतुङ्गतरङ्गमालाकोलाहलवाचालितहरिन्मुखे निर्विशेषप्रतिपत्तिनिष्ठुरे सति च सरितां पत्यौ, किमपि विगलितावधाने मनसि शनैश्शनैः प्रकोपलेशः पदं चकार । हरिहयहरित्तरुणीसीमन्तशोषणमणिमण्डने मार्तण्डमण्डले, सागरनिस्तारमात्रान्तरायं कार्यशेषं पर्यालोचयतस्तस्य तादृशं गाम्भीर्यसारमत्यक्रामदार्यहलमाचिरादेव रोषावेशः । अजनि च

सहसैव तावदारज्यदुग्रतारकादुर्निरीक्षनयनकोकनदम् उद्भट-भ्रुकुटिरेखाजटालफालतटम् अतिविशददशनसंदष्टरक्तरुचिरो-ष्ठपुटम् उत्कम्पशिथिलितजटाबन्धबन्धुरं शरीरम् ।

अकलितसमुत्थानश्च मार्ताण्डवंशकेतुरशेषमपि सागरं विशोषयितुकामः स्फायमानभयवेपमानविस्रस्तावयवेन वानर-सैन्येन स्तिमितनिस्तलनयनमवलोक्यमानः सपदि सुमित्रासुतेन विहितप्रणाममाश्वासमकालसमानीते विष्फारध्वानवित्रासित-विरिञ्चाण्डमण्डले धनुषि ब्रह्मास्त्राभिमन्त्रितं ब्रह्मदण्डप्रचण्डव-र्चसं तीक्ष्णतरकटाक्षच्छायाकरालितं शरोत्तमं समधत्त ।

तत्क्षणेनैव दशसु दिशासु युगपदेव प्रसरद्भिः कटुत-रक्षटझटारावकठोरस्फाररस्फुलिङ्गभङ्गभयङ्करैः उन्मिलद्बहलधूम-वितानशबलितैः अस्त्रानलकीलजालैरुत्तप्तसकलपाथः कथमानप-वमानविलुठदुत्तानितविविधसत्त्वजातसप्तसागरविस्तारम् उत्ता-लसाध्वसविध्वस्तधैर्यदह्यमानपरिभ्रमदसुरवीरदर्वीकरनिकर-हाहाकारपरिपूरितसप्तपातालललोकं निजरभसनिर्भरनिर्भिद्यमान-निखिलगन्धवहस्कन्धविशृङ्खलविषमप्रभञ्जनप्रसभविवशीभव-दूर्ध्वलोकविलोलदष्टाविंशतिकोटिविमानम् अकालप्रलयशङ्कात-ङ्कविधुरम् अखिलमेव कमलासनाण्डकटाहवलयमासीत् ।

तदा च क्षीयमाणवारः पारावारादाराद्दाविष्कृतदिव्यमूर्तिः आर्तिभयकम्पमानगात्रः कृताञ्जलिरुत्थाय स्वयमेव यादसां पतिः प्रभोः पादारविन्दसविधे बहुशः प्रणिपत्य प्रसाद्य निर्दिष्टसेतुबन्धसरणिर्मरुकान्तारविशोधनविनियोजितामोघतदीयसायकः सहसा तिरोबभूव ।

प्रकृतिमुपसेदुषः प्रभाकरवंशकेतोः प्रसादमधुरामामानतैरुत्तमाङ्गैरुद्वहमानैः प्रमदकलितकलकलकबलितककुबन्तरालैः कपिभिरहंप्रथमिकया हरिदन्तरेभ्यः समाह्वियमाणैरभ्रंलिहैरवनिरुहसहस्रैः, विशालैः शिलामण्डलैः, उत्तुङ्गैः शैलशृङ्गैः, वलाहाकारैर्महाशैलैरपि, अप्रमेयकौशलानुभावो विश्वकर्मात्मजो नलाभिधानो वानरयूथपतिरचिरादपांपतौ दशयोजनपरिणाहं शतयोजनाययामम्यद्भुतं सेतुमार्गमारचयामास ।

पवनसुतस्कन्धाधिरूढो दाशरथिः, तारासुतस्कन्धगतेन सुमित्रासुतेनान्वीयमानः, प्रचलदपरपारावारघोराकारेण प्रचुरविविधध्वानानिरुद्धदिक्तटेन प्लवगसैन्येन परिवृतो, विहितावधानेन विमतजनभङ्गदगदाविलसिताग्रहस्तेन विश्वस्तेन विभीषणेन प्रदर्शिताध्वा, नलसेतुना सपदि सागरं समुत्तीर्य

सुवेलशैलराजतटप्रदेशमध्यासांचक्रे । उत्तीर्णसागराणामुद्धत-भुजवीर्यसंपदां कपिवीराणामुत्कटहिक्कानादमेदुरैः आशरव-रपुटभेदननिकटनिबिरीसवर्तिनां रक्षसामट्टहासमिलितैश्च सिंह-नादैरितरेतरं व्यतिभवद्भिरभ्रगुणमयमिव त्रिभुवनमासीत् ।

तदनु मदनदूयमानमना दशाननो विशरणेयमवश्यं वश्या भविष्यतीति प्रत्यग्रवृक्णकण्ठं मायामयं रामशिरो निशाचरैः कपिबलकलकलार्कर्णनसुखायमानायै जनकत-नयायै प्रदर्शयामास । तेन चातिदुःखायमानामेनां प्रकट-सौहार्दवेगा त्रिजटा तस्यासत्त्वं प्रत्याययन्ती प्रत्यापन्न-चेतनामतनिष्ट ।

सरभसनिरस्तनयनिपुणवृद्धामात्यमतो निशाचरपतिः सविधवर्तिनि समग्रबले सपत्ने नगररक्षायामक्षय्यवीर्यानेका-नीकपरिवृतानाशरप्रवरानादिदेश । तदा च रघुनाथोऽपि विमलमतिना विभीषणेन विज्ञापितो विरोधिपुरानिरोधने करकलितमहाशैलान् नीलमुख्यान् बहुसैन्यपरिवारान्वानर-वीरानादिश्य पुरतःप्रचलदतुलबलभरपरिचूर्णितविषमाशि-लामण्डलं सुवेलशिखरमधिरूढः तदग्रसीमाविराजमान-विशालचामीकरशिलातलमलंचकार । आलुलोके च पुरतो

गिरिशिखरसीमानि दिवामिव विजेतुमुत्प्लवमानाम् अमल-कलधौतमयीम् अनेकमणिकिरणमालाजटिलां संध्यामेघसंदोहसंस्थानां दशाननराजधानीम् ।

तदवलोकनचित्रीयमाणचित्ते रघुराजपुत्रे, सवितृपुत्रः सपदि समुत्पत्य लङ्कापुरतुङ्गगोपुरवलभीनिषण्णस्य विहितविविधनियुद्धकेलिकलितबलावलेपस्य रिपोर्महितमणिसङ्घसङ्घटितं किरीटं शिरसः समाच्छिद्य वियद्भूजलङ्घनजाह्विकः प्रभोरुपायनीकृतवान् ।

दूत्यपदानियुक्तवृत्रारिनप्तृवचनाधिगतविमतदुश्चरितनिश्चयेन प्रोद्धतधनुर्ध्वानाविस्रंसितनक्तंचरीगर्भेण रिपुदर्पविमाथिना दाशरथिना नियुक्तैः सद्य एव वानरप्रवरैः परितो वरणवलयमधिरोहद्भिः, मर्दयद्भिरुद्यानानि, पूरयद्भिः परिखाः, पाटयद्भिः प्राकारान्, दारयद्भिर्गोपुराणि, भञ्जद्भिर्भवनानि, चूर्णयद्भिश्चन्द्रशालाः, विध्वंसयद्भिस्सौधान् अनुपलब्धपूर्वातङ्का लङ्कापुरी वाङ्मनसयोरविषयं दुरवस्थातिशयमन्वभाव्यत ।

उपचितप्रतिघातिरेककलुषिताक्षिनिवहेन रक्षसां पत्या

नित्यावलिप्तेन निर्दिष्टा हृष्टा दुष्टाशया निशाचरवीरा रथ्या-गजताश्वीयसंक्षोभवेगधूयमानधरातलाः समराय समन्ततो निर्यान्ति स्म ।

तत्र चित्रीयमाणवैमानिकावलोकितम् अलघुबलदर्पनिर्भरकृतहस्तनक्तंचरहस्तमुक्तशस्त्रशतशातितकुपितवानरं वानरवीरबाहुबलसंप्रेषितशिलातलपलाशिजातशैलपातनिष्पिष्टरुष्टनक्तंचरं विष्वग्विसारिकूलङ्कषकीलालवाहिनीसहस्रसंभेदसंवर्धमानसरिद्वल्लभं विशङ्कटकीकसपटलविपुलीकृतत्रिकूटकूटम् अभिमुखनिहतविबुधीभूतवीरवरवरणकौतूहलचपलायमानसुरलोकयौवतं शस्त्राशस्त्रि तलातलि दन्तादन्ति च संततपिशितजेमनस्थूलंभावुकसंपातिकुटुम्बकं सांपरायिकं प्रतिभयमजृम्भत ।

अचिरादपक्षीयमाणेषु क्षपाचरेषु, हर्षमाणेषु वानरबलेषु, वालितनयविमथिताद्रथादनुवियत्पथमुत्पतितो मायातिरोहितविग्रहो विक्रमैकनिधानं शक्रविजयी दशकन्धरात्मजः स्वयमात्मभुवा समर्पितैरप्रातिमधामाभिः सर्पाकारैः शरैः समरशिरासि कीलितशरीरौ दाशरथी मोहावेशविवशौ निवेशयामास । वानरचमूं महतीं शातशरजातपीडितामपेतचेतनामकरोत् । दशाननोऽपि निशमितदशरथसुतवि-

पत्तिर्जनकतनयासंवननाय सुतरां जागरामास ।

तदा च कल्पापायकालनिर्भरविजृम्भमाणमहावातसमधिकाटोपपक्षवातविक्षोभितसागरः तार्क्ष्यः तत्क्षणादेव दिवोऽवतीर्य निष्पर्यायपराक्रमौ रामलक्ष्मणौ विगलितनागबन्धौ विदधे । मूर्च्छापगमसमुत्थितसमर्थसमस्तवानरसिंहसिंहनादाकर्णनपरिक्षुभितेन दशमुखेन प्राहिता नैर्ऋतपृतनापतयो रभसवेगधूम्राक्षिमुखाः धूम्राक्षमुखाः क्रमेण समराय निर्ययुः ।

तत्र प्रमथितेषु प्रधानयातुधानवीरेषु प्रहस्तप्रमुखेषु प्रथमानरोषः प्रभुर्विभावरीचराणां स्वयमेव मुखनिवहगह्वरनिःसृतानिध्वानभेदविह्वलीकृतवलीमुखसार्थः समरभुवमवतार । स तु रणशिरासि पराक्रममाणमाक्षिगतमक्षतशक्त्या शतधृतिवितीर्णया शक्त्या विक्षतवक्षःस्थलं विदधे ।

भुवि निपतिते तस्मिन् उन्नतमन्युवेगसमाक्रान्तचेतसा रघुसिंहेन निरन्तरशरप्रकरनिकृत्तनिखिलसाधनो विदलितविकटमुकुटतटो दशमुखः कथमपि समरान्निवृत्य कान्दिशीकः स्वान्तःपुरोदरमाविशत् ।

दुर्विषहरघूद्वहसायकानुस्मरणव्यथमानचित्तो नक्तंचराधिपतिः अयुतहायनीसमार्जितदुश्चरतपोविपाकमयीं निद्रां निषेवमाणस्य निर्जरकुलविध्वंसलब्धवर्णस्य कनीयसः कुम्भकर्णस्य प्रबोधनाय प्रथितसाराग्निशाचरान्निरदिशत । बहुमहाचलकन्दराविरतविवृततदीयवदनघोणाकुहरोदराहमहमिकानिर्जिहानानिःश्वासानिलकल्लोलजालतूललीलानुविधायिनः तेऽपि कथमपि निद्रागारं प्रविष्टा महता प्रयत्नेनैनं गलितभूयिष्ठसंवेशमुद्रं व्यधिषत ।

उल्लङ्घितवप्रेण प्रथनभुवि विहरमाणेन तेन गोत्राचलगोत्रगात्रेण परिमृद्यमानमहाकपयः तस्यैव गहने केशश्मश्रुकानने न्यलीयन्त । स च कपिराजकरहृहदशनकुलिशापहृतकर्णनासो रघुवीरशरविलूनैकैकावयवनिष्पातनिष्पिष्टानेकसत्त्वजातो मर्दयन् कपिराक्षससैन्यानि, दारयन् गिरिशिखराणि, क्षोभयन्पयोनिधिजलं, क्ष्मापयन् क्षमातलयं, वलशासनायुधविदलितविपुलपक्षो महान्महीधर इव पपात ।

प्रियसहजविनाशवेदनातुरमनसि विलापाविलवचसि जनयितरि, तदनुजया यौवनमदोद्धद्धवीर्यबलावज्ञातसमस्तसुरासुरा दशमुखतनया विनयानुरोधपराङ्मुखाः स्वानुरूपानेक-

परिवाराः करालशिरोमुखाः समीकाय समनह्यन्त । तेष्वप्यो-
ज्जायमानवानरवीरदावपावकशलभायितेषु तनयशोकाकुलि-
तचेतसं पितरमभिवन्द्याशीर्भिरभिवर्धितः कारानिरुद्धवृद्ध-
श्रवःकरचरणबन्धनशृङ्खलाखणाखणायितकलितविक्रमप्रशस्तिः
शक्राजित् उत्तालशौर्यसारोष्मायमाणकुलपुत्रप्रायप्रभूतपरिवा-
रो भूयोऽपि भूयसे जन्याय संनह्यते स्म ।

स तु नितान्तवित्रासितविश्वचक्रेण महता विक्रमेण
सानुप्लवौ विप्लवमानधैर्यौ रघुवंशधुर्यौ विमोह्य वैदेह्यामु-
त्सुकं पितरमानन्दयामास । पौलस्त्यपरिचोदिताभिर्यातुधा-
नीभिः कुबेररूप्यं पुष्पकाख्यं विमानोद्धमधिरोपितां
वियता समरसीमानमवापितां पतिविपदवलोकनजनितशो-
कविमोहितामकुटिलाशया त्रिजटा समाश्वासयत् ।

विदितपरावरेण विधातृनन्दनेन समीरितः समीरण-
सुतः सहसा तुहिनाचलसमाहृतौषधिपर्वतगतमहौषधिबलेन
सर्वानपि तान्विधूतमोहान्विदधे । उत्कटरोषाभिभूतस्य वान-
राधिपतेर्निदेशेन सर्व एव वानराः सर्वाभिसारेण सर्वतः
समारुह्य पुरीमशेषामन्वशोषितपदार्थसार्थमग्निसाच्चक्रुः ।

अपेतराक्षसामपि रक्षोमयीं नगरीं निरीक्षमाणः प्रकटरोषभीषणाकारो रावणिः सपक्षस्य विपक्षस्योज्जासयिष्यन् मायानुभावनिर्मितां मैथिलसुतां तदग्रतो निस्त्रिंशघातं निहत्य तदुपलम्भव्यामोहितेषु विमतेषु संभृतसंभारां निकुम्भिलाशालां प्राप्तः प्रबलानेकरक्षोवीररक्षितः सकलसपत्नाक्षियाकरीमाभिचारक्रियामारभत । विज्ञाय च तत्प्रज्ञावतां प्रथमेन समाश्वासितराघवेण त्वरमाणेन विभीषणेन संचोदितः तत्प्रदर्शितदुरवगाहपद्धतिर्बद्धयुद्धपरिकरः सौमित्रिरनेकवलीमुखानीकपरिवृतो निकुम्भिलायामुपक्रान्तस्याभिचारविधेरन्तरायमकुरुत ।

इन्द्रजिदपि भ्रातृव्यभूयमुपेयमानाय पितृव्यायेर्ष्यन् आबद्धपरिकरः सर्वौघेन पवनतनयवाहनं सौमित्रिमभ्ययुङ्क्त ।

तयोश्च युध्यमानयोरिद्धमानयोर्व्यतिरसमानयोः काकुत्स्थपुलस्त्यान्वयैकवीरयोरविश्रान्तयोरश्रान्तयोरहस्तितयमत्यगात् । तथा संप्रहरन्तं संप्रहारशौण्डं मण्डोदरीसुतं समिति सुमित्रापुत्रो रघुवरानुभावसंधुक्षितौजसा बैडौजसास्त्रेण विगतजीवितमतनोत् ।

विमथितपरिपन्थिनो विबुधराजविजयिनः प्रियतन-

यस्य प्रत्यावृत्तिपथे दीयमानाशेषदृष्टिः प्रतिमुहुर्मैथिलीसमागमेन प्रत्यासीदता सुखायमानो दशाननः सहसा समापतितेभ्यः प्रत्यवयवस्रवदास्रधारापाङ्किलेभ्यो रोरुद्यमानेभ्यो निशाचरेभ्यः तादृशं दैवदुर्विपाकं संशुश्राव । प्रियसुतनिधनव्याकुलीकृतचेतसस्तस्य दशभ्योऽपि वदनकन्दरेभ्यः प्रौढगद्गदिकानिरुध्यमानकण्ठस्य युगपदेव विस्पष्टवर्णाविलाः विलापवाचो विविधाः प्रादुरासन् ।

निर्ययौ च सद्यः सम्भेधमानरोषसंरम्भातिरस्कृतदुःखभारः क्षपाचरसार्वभौमः क्षणसन्नद्धसमुन्नद्धसमस्तसैन्यसंदोहसंवृतः सन् जिहीर्षुरिव समं समानि भुवनानि निष्पश्चिमप्रसराय महीयसे समरोत्सवाय स पुरस्तात्परमेण तेजसा दिवसकरमधःकुर्वाणम् अभिनवतमालदलमनोहरकान्तिम् आबद्धजटाभारभासुरोत्तमाङ्गम् अरुणसरसिजायतविलोचनम् अनीकारम्भगाढविनद्धमुग्धवल्कलवसनम् उज्ज्वलशरशरासनभासमानकरारविन्दम् आनन्दनिष्यन्दमखिललोकनयनानाम् अनङ्गमिव संगृहीततापसवेषम् अनुपमगुणैकमान्दिरं रामचन्द्रमवलोकयामास ।

अचिरादेव समूलकाषं कषिते मूलबले, मध्येवर्ममु-परुन्धानमिन्धानकोपः सुमित्रापुत्रमक्लिंपचानशक्तिः शक्त्या विचेतीकृत्य युद्धमहाय बद्धपरिकरं रघूत्तममाससाद । सौमित्रिं च समीरणसंभवः सत्वरसमाहृतमहौषधिबलेन नीरुजं चक्रे । तदा च दशवदनवधं विधास्यमानाय युयुत्समानाय मानुषवेषतिरोहिताय विष्टरश्रवसे वृद्धश्रवा निजमेव नित्यनिरस्तदैत्यवीरमनोरथं रथोत्तमभुत्तपमानमातलिकरगृहीतप्रग्रहप्रहर्षहेषमाणहरिसहस्रभास्वरं प्रजिघाय ।

अथ तयोरुपरचितसामितिकौतुकयोः इतरेतरं सरभसमापतितयोः सावित्रपुलस्त्यवंशचित्रकयोः अनिशवलयितचापविसृमरविशिखविसरविदारितावयवं विस्मयरसविस्मारितपरस्परवैरवानरनिशाचरानिकरनिर्निमेषनिरीक्षितम् अस्त्रसंपातसाध्वसदूरीभवदमरलोकमुखविगलितसाधुवादपिचण्डलहरिन्मण्डलम् अतिचिराय समरमहः समजृम्भिष्ट ।

इत्थंकारमुद्धतभुजाटोपं युध्यमानं यातुधानेश्वरं शाश्वतिकनिरुपमधामा सवितृवंशकेतुः पैतामहमहास्त्रमहःपटलजटिलेन दिव्यशरेण विदारितकठोरवक्षःशिलाघाटमपगतजीवितमवनौ निपातयामास ।

मदसलिलघोरणीदुर्दिनायमानहरिदन्तदन्तिसंहतिबृंहितपरिबृंहितैरमरदुन्दुभिनिध्वानैरापूर्यमाणे जगति, विभीषणगृहैर्विभावरीचारिभिः कारोपरोधान्मुच्यमानासु बन्दसुरसुन्दरीषु, दिव्यजनकरविमुक्तनव्यतरमन्दारकुसुमविसृमरमकरन्दशीकरासारभारिकमन्दमारुतपरिपीयमानस्वेदाबिन्दुसुन्दरमुखारविन्दो मधुनिरीक्षणस्मितलवाभिनन्द्यमानप्रणमदखिलवलीमुखसैन्यकरकोरकमालिकानिबिडितानिकटदेशः क्षणमटनीविन्यस्तहस्तो विश्राम्यति स्म ।

विहितसमुचितसत्कारविसृष्टपुरुहूतसूतस्य तस्य सुमनायमानस्य जगतां पत्युः शासनेन कृतदशवदननिवापकृत्यं निस्तुषतपःशौचदयासत्यसरणिनित्याभिनिविष्टधिषणम् अपगताशेषदूषणं विभीषणमात्मनैव सुमित्रात्मजः पुण्यकृतां पुरोगाश्चिराय सर्वपुण्यजनसार्वभौमपदे स्थापयामास ।

आजानविशुद्धापि निशाचरपुराचिरोषिता जानकी विवर्णजनतावर्णशाङ्किनः पत्युः परुषाक्षरविक्षता विगतविशयमाशुशुक्षाणिमाविक्षत् । तदङ्गसङ्गपरिपूतात्मा पावकः स्वयमेव देवीमम्लानमाङ्गल्यमाल्यामखिलकर्मसाक्षी साक्षात्कृतदिव्यपुरुषाकारः प्रवणाय रावणान्तकाय प्रायच्छत् ।

प्रमदातिरेकप्रत्यक्षीभवदमरवरवरानुभावप्रत्युज्जीवित-
प्रथनप्रमितप्लवगप्रवीरः प्रभाकरवंशमौलिः निरुपमकरुणामृत-
सागरो निजपादुकानियोज्यमवरजं भरतमवलोकितुमुदकण्ठत।
सौहार्दसान्द्रेण सानुचरेण विभीषणेन, सकलसैन्यसंवृतेन
सवितृसुतेन च समं, सुमित्रातनयजानकीपरिशोभमानपार्श्वः
दशवदनचरं भुजबलविजितं जवाजितमनसं विमानतल्पजमलंकु-
र्वाणः सुरसरिदुल्लोललोलकनकसरोजपरागसौरभवैवाधिकसमी-
रकिशोरविहारसुभगंभावुकेन पथा साकेतपुराय प्रतिष्ठते स्म ।

शृङ्गिबेरपुरे गुहेन सङ्गतस्ततोऽपि पवनसुतवदनाव-
गतनिजचरितेन भरतेन परितोषतरङ्गितेन सावरजेन प्रम-
दतरलितबहुलजनतानुयातेन प्रत्युद्गम्यमानो रघुनन्दनो नन्दि-
ग्राममलमकरोत् । अपनीतमुनिवेषः सहानुजः सप्रकृतिपौर-
जानपदो मनुवंशप्रसूतमहीपुरन्दरकुलराजधानीमयोध्यां संप्रा-
प्तवान् । भक्तिभरप्रणम्यमानगुरुजनाशीर्वादाभिनन्दितं राम-
चन्द्रं गरिष्ठतपसो वसिष्ठप्रमुखा महर्षयः सकलजगतीवलय-
साम्राज्यपदव्यामभ्यषिञ्चन् ।

अभिषेकमहोत्सवोपलम्भसंभृतपरमानन्दतुन्दिलात्मानौ
महात्मानौ पौलस्त्यविकर्तनात्मजौ कतिपयदिवसापगमे मही-

पतिर्महितविविधसत्कारविकस्वरप्रमोदपरिजनपरीतौ विरहास-
ह्यावपि 'परिपालनलक्षणमात्मविशोधनैकप्रयोजनम् अकरणे
प्रत्यवायविधायिनं स्वधर्ममनुतिष्ठतम्' इत्यत्यन्तसौहार्देन
प्रयुक्तसामानि जनपदाय प्रस्थापयामास ।

इति विहितविबुधकृत्यो विश्वानुजिघृक्षया गृहीत-
मानुषवेषो भगवानरविन्दनाभः सदारावरजः सकलमित्र-
परिवृतो निसर्गनिस्तुषनिजचरितवितीर्णनिखिलभुवनानन्दः
चिराय परमेण सुखेन सुतरां विरराज ॥

निशाचरतमोलीनजगदुन्मेषहेतवे ।
० ० ० तेजसां निधये ० ॥
यं वासुदेवमनुरूपमवाप पुत्रं
नारायणो विमलबुद्धिरुमा तथाम्बा ।
प्राणायि तेन मनुवंशपतेः कथेयम्
आदित्यवर्मनृपतेः कृतिनो निदेशात् ॥

॥ इति रामकथा संपूर्णा ॥